॥ श्रीः ॥

सर्वसमवृत्तप्रभावः

अयं ग्रन्थः

निवृत्तमहीशूरदेशीयसंस्कृतशालोपद्रष्टृपदेन चेन्नरायपत्तनाभिजनेन

श्रीवेङ्कटरमणार्येण

विरचितः

8459

Sa4Ch
Ven

मैसूरु
राजकीयशाखामुद्रालये सम्मुद्रितः
१९३८

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 8459
Date. 11. 3. 57
Call No. Sa4Ch
Ven

Opinion by
Mahamahopadhyaya Arthasastravisarada, Vidyalankara Panditaraja Dr. R. Shamasastry.

I read with great pleasure a few of Mr. C. Venkataramanaya's manifold Sanskrit works both in verse and prose: The Navagitakusumanjali, religious lyrics, the Umadarsa, a Sanskrit translation in verse, of Mr. K. A. Krishnaswami Iyer's English Poetry entitled "Uma's Mirror," the Stutikusumanjali, hymns in praise of Gods and Goddesses, the Samavrittaprabhava, a work on Sanskrit metre, the Kamalvijaya, a drama in five Acts or Lord Tennyson's "the Cup" rendered in Sanskrit. Mr. Venkataramanaya's style is simple and dignified, and diction sweet and elegant, his verses, to illustrate the various Sanskrit metres, are all charming and the last chapter on the process of calculating the number of various metres of various Gana-syllables is more lucid than Kedara's Prastara in his Vrittaratnakara. I think that the brilliant Oriental dress in which our poet has clothed Tennyson's drama is more attractive to the East than the original.

May God bless the poet to give us many more of his charming literary pieces.

MYSORE,
11th August 1938. (Sd.) R. SHAMASASTRY.

अभिमतम्

विदितमेवैतत्समेषां विदुषां, यत्किल "छन्दः पादौ तु वेदस्य" त्यादिना वेदमहापुरुषस्य छन्दश्शास्त्रं प्रतिष्ठासाधनपादरूपमिति। छन्दांसि विना ऋचः कथं प्रतिष्ठां लभेरन्? यतः बह्वृचब्राह्मणे गायत्र्यादिछन्दसां वेदनपुरस्सरं अनुष्ठातुः फलविशेषाः प्रदर्शिताः, तथाहि— "तेजो वै ब्रह्मवर्चसं गायत्री, उष्णिहा वाऽऽयुष्कामः कुर्वीत, अनुष्टुभौ स्वर्गकामः, बृहत्यौ श्रीकामः, यशस्कामः, तृष्टुभौ वीर्यकामः, जगत्यौ पशुकाम. विराजावन्नाद्यकामः, कुर्वितेति"। "विराट्छन्दसा याज्यानुवाक्ये विधातुकामस्य सर्वेषां छन्दसां सायुज्यं सरूपतां सलोकतामश्नुते, य एवं विद्वान् विराजौ कुरुते।" इत्यादिना। अत एव तत्तन्मन्त्राणां ऋषिछन्दःपरिज्ञानाभावेन कर्माण्यनुतिष्ठतः महाननर्थो दर्शितः निरुक्तशास्त्रे। "यो ह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽऽध्यापयति वा स्थाणुं वर्छति गर्ते वा पात्यते पापीयान् भवतीति।" तैत्तरीयब्राह्मणेऽपि "गायत्रीभिर्ब्राह्मणस्याऽऽदध्यात्, तृष्टुभीराजन्यस्य जगतीभिर्वैश्यस्येत्यादि। लोकेऽपि पिङ्गलनागः वैदिकछन्दांस्यवलंब्य लौकिकवृत्तानि, वंशस्थ—रुचिरा—रथोद्धता—मालिनी—स्रग्धरादीन्यासूत्रयामास। तेषां सूत्राणां भाष्यादिग्रन्थाः विस्तृता विरला इति, केदारान्तर्वाणिः वृत्तरन्ताकरं नाम प्रकरणग्रन्थं निर्ममे। छन्दोविचितिर्नाम कश्चन ग्रन्थः दण्डिना निरमायीति श्रूयते। छन्दोमञ्जरीत्यादयः त्रिचतुराः ग्रन्थाः वृत्तस्वरूपावेदकाः प्रसिद्धाः।

इतरशास्त्रवदिदं छन्दश्शास्त्रं बहुभिस्सूरिभिर्विवरणाय न प्रक्रान्तं । तदे-तत्सर्वमालक्ष्य, कल्याणनगरस्थैर्विश्रान्तसंस्कृतसर्वशालाध्यक्षैः चन्नराय-पत्तनाभिजनैः वेङ्कटरमणार्यैः वृत्तरत्नाकरोक्तमार्गेण तदीयसूत्राण्यालंब्य, सर्वेषां वृत्तानां बहून्युदाहरणानि कालानुगुण्येन मन्दजनोद्दिधीर्षया स्वप्रतिभया विरचय्य अस्मिन् ग्रन्थे संयोजितानि । मयाप्यामूलाग्रमव-लोकितानि, परिष्कृतानि च मुद्रणकार्याय । लौकिकानां छन्दसां म य र सादीनां गणानां च अभिमानिन्यः देवताः लक्ष्म्यापादनादि कार्यं, च 'मो भूमिस्त्रिगुरुः श्रियं वितनुते, भ ऽ पूर्वगुश्चन्द्रमाः' इत्यादिना स्फुटीकृतम् । एतद्ग्रन्थावलोकनेन विद्यार्थिनः महत्तरफलं लभेरन् इति मन्ये । वृत्तरत्नाकरग्रन्थप्रदर्शितप्रस्तारादिक्रमापेक्षया अस्मिन् ग्रन्थे प्रतिपादितप्रस्तारपदकसंख्यानिर्णयादितन्त्राणि विद्यार्थिनामनायासेन साहाय्यमाचरन्ति । विद्वद्वराश्च परिशील्येमं ग्रन्थं अमन्दानन्दमधि-गच्छन्तीति शम् ॥

मैसूरु,
१०–८–१९३८

साहित्यरत्नम् अलङ्काररक्षामणिः
महाविद्वान् के. **गोपालकृष्णशास्त्री,**
मैसूरु विश्वविद्यालय संस्कृतपण्डितः.

ANNOUNCEMENT.

Copyright of this work is not reserved by the author, as the work is solely intended for the general enlightenment. So, if more copies are required at any time, any individual or agency may get the work re-printed in any number of copies, without claiming copy-right to the work. If, however, a commentary in Sanskrit, or notes, or translation in any language is written on, and affixed to the work, then copy-right may, justly and rightly, be claimed and reserved by any individual or by any Educational Institution or by any other agency.

MYSORE, 7th July 1938. — C. VENKATARAMANAIYA, *Author.*

INDEBTEDNESS.

I am greatly indebted to the Government of His Highness the Maharaja of Mysore for kindly showing to me some concession in getting my Sanskrit works printed at half the cost in the Government Branch Press, Mysore, and also to the Government Branch Press, Mysore, for expediting the printing of the work and neat get up.

MYSORE, 7th July 1938. — C. VENKATARAMANAIYA, *Author.*

प्रकटनम्

एतद्ग्रन्थसंबन्धाधिकारः कोऽपि ग्रन्थकर्त्रा न स्वायत्तीकृतः । तस्माद्यदा कदावाऽप्यधिकानि पुस्तकान्यपेक्षितानि भवन्ति, तदा यस्य कस्य वा एतन्नाटकस्य पुनर्मुद्रणकार्ये भवति निरर्गलोऽधिकारः । परन्तु ग्रन्थस्य स्वायत्तीकरणे न तस्याधिकारः । तथाप्ययं ग्रन्थः, व्याख्यासमेतो वा विवरणसहकृतो वा भाषान्तरपरिवर्तनपरिष्कृतो वा यदि भवेत्, तदा तद्व्याख्यादिकर्तुः, तत्प्रातिनिधेः, विश्वविद्यापीठादेः, कस्य वा तदितरसमाजादेः, तादृशव्याख्याद्युपेतस्यास्य ग्रन्थस्य न्यायतः स्वायत्तीकरणपूर्वकमेव सर्वे मुद्रणाद्यधिकाराः निश्चिताः ग्रन्थकर्तृसम्मताश्च भवन्ति ॥

मैसूरु,
३-७-१९३८.

श्री. वेङ्कटरमणार्यः,
ग्रन्थकर्ता.

कृतज्ञता

समयेऽस्मिन् एतद्ग्रन्थसंशोधनादिकार्ये साहाय्यमाचरितवतां श्रीमन्महीशूरमहाराजस्य आस्थानमहाविदुषां साहित्यरत्नम् अलङ्काररक्षामणिः इत्यादिबिरुदाङ्कितानां कन्नवाडि गोपालकृष्णशास्त्रिणां, मुद्रणकाले अक्षरस्खलनादिदोषशोधनादिकार्ये सहायभूतानां आस्थानविदुषां सोसले कृष्णस्वामिशास्त्रिणां, सदसद्व्यक्तिपूर्वकं स्वाभिमतप्रदर्शकानां विमर्शकानां च कृतज्ञो भूत्वा सप्रश्रयमभिवन्दनसन्ततिम् समर्पये ॥

मैसूरु,
६-७-१९३८.

श्री. वेङ्कटरमणार्यः,
ग्रन्थकर्ता.

विषयसूचिका

संख्या	छन्दः		वृत्तम्		पुटम्
१	उक्ता	....	श्रीः	....	1
२	अत्युक्ता	....	स्त्री	....	1
३	मध्यमा	....	नारी	....	2
	,,	....	मृगी	....	2
	,,	....	यगणवृत्तम्	....	2
	,,	....	र ,,	....	2
	,,	....	त ,,	....	2
	,,	....	न ,,	....	2
	,,	....	भ ,,	....	2
	,,	....	ज ,,	....	2
	,,	....	स ,,	....	2
	,,	....	म ,,	....	2
४	प्रतिष्ठा	....	कन्या	....	3
५	सुप्रतिष्ठा	....	पङ्क्तिः	....	3
६	गायत्री	....	तनुमध्या	....	3
	,,	....	शशिवदना	....	3
	,,	....	वसुमती	....	4
	,,	....	विद्युल्लेखा	....	4
	,,	....	सोमराजी	....	4
७	उष्णिक्	....	मदलेखा	....	4
	,,	....	मधुमती	....	5
	,,	....	कुमारललिता	....	5
	,,	....	हंसमाला	....	5

संख्या	छन्दः		वृत्तम्		पुटम्
८	अनुष्टुप्	....	चित्रपदा	....	5
	,,	....	विद्युन्माला	....	6
	,,	....	माणवकम्	....	6
	,,	....	हंसरुतम्	....	6
	,,	....	समानिका	....	6
	,,	....	प्रमाणिका	....	6
	,,	....	वितानम्	....	7
	,,	....	नाराचिका	....	7
	,,	....	कबरी	....	7
	,,	....	श्लोकः	....	7
	,,	....	गजगतिः	....	8
९	बृहती	....	हलमुखी	....	8
	,,	....	भुजङ्गशिशुसृता	....	8
	,,	....	भुजङ्गसङ्गता	....	8
	,,	....	मणिमध्यम्	....	8
१०	पङ्क्तिः	....	सुमुखी	....	9
	,,	....	शुद्धविराट्	....	9
	,,	....	पणवम्	....	10
	,,	....	मयूरसारिणी	....	10
	,,	....	रुक्मवती	....	10
	,,	....	मत्ता	....	10
	,,	....	मनोरमा	....	11
	,,	....	चम्पकमाला	....	11
	,,	....	त्वरितगतिः	....	11
११	त्रिष्टुप्	....	उपस्थिता	....	11
	,,	....	इन्द्रवज्रा	....	12
	,,	...	उपेन्द्रवज्रा	....	12
	,,	....	उपजातिः	....	12

संख्या	छन्दः		वृत्तम्		पृष्टम्
	त्रिष्टुप्	....	सुमुखी	....	13
	,,	....	दोधकम्	....	13
	,,	....	शालिनी	....	13
	,	....	वातोर्मी	....	14
	,,	....	भ्रमरविलसितम्	....	14
	,,	....	रथोद्धता	....	14
	,,	....	स्वागतम्	....	14
	,,	....	वृत्ता	....	15
	,,	....	पृथ्वी	....	16
	,,	....	भद्रिका	....	16
	,,	....	चित्रवृत्ता	....	16
	,,	....	श्येनिका	....	16
	,,	....	मौक्तिकमाला	....	17
	,,	....	श्रीवृत्तम्	....	17
	,,	....	उपस्थिता	....	17
	,,	....	सम्मता	....	18
	,,	....	कुमारी	....	18
१२	जगती	....	चन्द्रवर्त्मा	....	18
	,,	....	वंशस्थम्	....	18
	,,	....	इन्द्रवंशा	....	19
	,,	....	उपजातिः	....	19
	,,	....	तोटकम्	....	20
	,,	....	द्रुतविलंबितम्	....	21
	,,	....	पुटः	....	21
	,,	....	प्रमुदितवदना	....	21
	,,	....	कुसुमविचित्रा	....	21
	,,	....	जलोद्धतगतिः	....	22
	,,	....	भुजङ्गप्रयातम्	....	23

संख्या	छन्दः		वृत्तम्		पुटम्
	जगती	....	स्रग्विणी	....	23
	”	....	प्रियंवदा	....	23
	”	....	मणिमाला	....	23
	”	....	ललिता	....	24
	”	....	प्रमिताक्षरा	....	24
	”	....	ज्वाला	....	24
	”	....	वैश्वदेवी	....	25
	”	....	जलधरमाला	....	25
	”	....	अभिनवमालिका	....	25
	”	....	प्रभा	....	25
	”	....	मानिनी	....	26
	”	....	अभिनवतामरसम्	....	26
	”	....	गौरी	....	26
	”	....	ललना	....	27
	”	....	ललितम्	....	27
	”	....	मौक्तिकमाला	....	27
	”	...	कोकरता	....	27
१३	अतिजगती	....	चञ्चरीकावली	....	28
	”	....	क्षमा	....	28
	”	....	प्रहर्षिणी	....	28
	”	....	मत्तमयूरम्	....	28
	”	....	रुचिरा	....	29
	”	....	मञ्जुभाषिणी	....	29
	”	....	सरसा	....	29
	”	....	सुमङ्गलिका	....	29
	”	....	प्रभद्रकम्	....	30
१४	शक्करी	....	असंबाधा	....	30
	”	....	अपराजिता	....	30

संख्या	छन्दः		वृत्तम्		पुटम्
	शक्करी	....	वसन्ततिलका	....	31
	,,	....	प्रहरणतिलका	....	31
	,,	....	इन्दुवदना	....	31
	,,	....	अलोला	....	31
	,,	....	कुमारी	....	32
	,,	....	मञ्जुभाषिणी	....	32
	,,	....	सुकेसरम्	....	32
	,,	....	मदनार्ता	....	33
	,,	....	पथ्या	....	33
	,,	....	प्रमदा	....	34
	,,	....	मध्यक्षामा	....	34
	,,	....	वासन्ती	....	34
१५	अतिशक्करी	....	लीलाखेला	....	35
	,,	....	तूर्णकम्	....	35
	,,	....	शशिकला	....	35
	,,	....	स्रक्	....	35
	,,	....	मणिगुणनिकरः	....	36
	,,	....	मालिनी	....	36
	,,	....	चन्द्रलेखा	....	37
१६	अष्टिः	....	वृषभगतिविलसितम्		37–38
	,,	....	अश्वगतिः	....	38
	,,	....	पञ्चचामरः	....	38
	,,	....	गुणभूषा		38–39
	,,	....	वाणिनी	....	40
१७	अत्यष्टिः	....	शिखरिणी	....	40
	,,	....	पृथ्वी	....	40
	,,	....	वंशपत्रपतितम्	....	41
	,,	....	मन्दाक्रान्ता	....	41

संख्या	छन्दः		वृत्तम्		पुटम्
	अत्यष्टिः	....	हरिवृत्तम्	....	41
	,,	....	नत्कुटकम्	....	42
	,,	....	कोकिलकम्	....	42
	,,	....	चित्रलेखा	....	42
१८	धृतिः	....	हरिचङ्क्रमा	....	43
	,,	....	हरिणप्लुतम्	....	43
	,,	...	(निशा सुधा-नाराचम्)		43–44
	,,	....	करिणी	....	44
	,,	....	कुसुमितलतावेल्लता	....	44
	,,	....	हरनर्तकम्	....	44
	,,	....	चित्रलेखा	....	45
	,,	....	नन्दनम्	....	45
	,,	....	शार्दूलललितम्	....	45
१९	अतिधृतिः	....	मेघविस्फूर्जितम्	....	46
	,,	....	शार्दूलविक्रीडितम्	....	46
	,,	....	मणिदीप्तिः	....	46
	,,	....	वाणी	....	47
	,,	....	सुमधुरा	....	47
	,,	....	सुरसा	....	47
२०	कृतिः	....	वृत्तम्		47–48
	,,	....	सुवदना	....	48
	,,	....	गीतिका	....	48
२१	प्रकृतिः	....	स्रग्धरा		48--49
	,,	....	पञ्चकावली	....	49
२१	आकृतिः	....	मद्रकम्	....	49
	,,	....	हंसी		49–50
	,,	....	मत्तेभम्	....	50
	,,	....	लक्ष्मीः	....	50

संख्या	छन्दः		वृत्तम्		पुटम्
२३	विकृतिः	....	मत्ताक्रीडा	....	51
	,,	....	अद्रितनया	....	51
	,,	....	अश्वललितम		51–52
२४	संकृतिः	....	तन्वी	....	52
	,,	....	अश्वललितम्	....	52
२५	अभिकृतिः	....	क्रौञ्चपदम्	....	53
२६	उत्कृतिः	....	भुजङ्गविजृंभितम्	....	53
	,,	....	अपवाहकः		53–54
	,,	....	शंभुनटनम्	....	54

उपोद्घातः

वाचां प्रभावः—

१ लोकेऽस्मिन् वागेव खलु सर्वव्यवहारहेतुर्मनुष्याणां । सा च वर्णात्मिका व्यक्तध्वनिप्रधाना । वर्णाश्च स्वराः नव, व्यञ्जनानि त्रयस्त्रिंशदिति द्वाचत्वारिंशत्संख्याकाः । वर्णसमुदायः पदं । तिङन्तपदरहितपदसमूहः पदकदम्बकम् । उक्तं वा अध्याहृतं वा तिङन्तपदं, तत्सहितपदसमूहः वाक्यं । तच्च वाक्यं द्विविधं छन्दोनिबद्धात्मकं तदनिबद्धात्मकं चेति । वैदिकग्रन्थेषु सर्वे मन्त्राः सर्वा ऋचः छन्दोनिबद्धाः।यजुरादीनि छन्दोऽनिबद्धानि । तथैव ब्राह्मणानि, आरण्यकानि, उपनिषदश्च प्रायः । सूत्रग्रन्थास्सर्वे, तद्भाष्यटीकादयश्च वाक्यरूपा एव । लौकिकग्रन्थेषु वृत्तनिबद्धानि पद्यानि. तदनिबद्धानि गद्यानि, वचनात्मकानि । स्मृतिपुराणकाव्यादयो ग्रन्थाः वृत्तबद्धाः । कथाकादम्बर्यादयः केवलवाक्यरूपाः ॥

छन्दोमाहात्म्यम्—

२ 'पुरुषस्य पापसम्बन्धं वारयितुमाच्छादकत्वाच्छन्दः । चीयमानाग्निसन्तापस्याऽऽच्छादकत्वाच्छन्दः । अपमृत्युं वारयितुमाच्छादयतीति छन्दः' इति छन्दश्शब्दो व्युत्पादितः । वेदाङ्गान्यतमं छन्दः वेदपुरुषस्य पादस्थानीयं । यथा पादसहायमन्तरेण सर्वो गमनादिव्यवहारः न सम्पद्यते, तथा छन्दस्सहायमन्तरेण वेदपुरुषस्य गतेरेवाऽसंभवः । अतः वाक्प्रपञ्चे छन्दश्शास्त्रम् विशेषेण प्रामुख्यं भजति । तथा चोक्तं—'म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।

समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥' मनुनाप्युक्तम्—
'यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत्' इति । छन्दांसि उक्ताद्युत्कृत्यन्तानि षड्विंशतिसंख्याकानि । तदुद्भवानि सर्वाणि वृत्तानि ॥

गुरुलघुज्ञानोपायः—

३ वृत्तान्यक्षरमयानि । अक्षराणि गुरुलघ्वात्मकानि । लघ्वक्षरोच्चारणकालस्य 'मात्रा' इति व्यपदेशः । गुर्वक्षरम् द्विमात्राकालिकं । तल्लक्षणन्तु—संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंयुक्तम् । विज्ञेयमक्षरं गुरु लघु पादान्तस्थं विकल्पेन ॥
इत्यार्यया विहितम्—

'सग्रामं नः पालयेन्मत्सखेव'

इत्यत्र क्रमेणोदाहरणानि निर्दिष्टानि । एतल्लक्षणघटितगुरोर्भिन्नो लघुः । गुरुसंज्ञा (ऽ), लघुसंज्ञा (।), इति प्राचीनैरङ्गीकृतं । तथापि मुद्रणादिसौकर्यपर्यालोचनया, गुर्वक्षरसंज्ञा (–) लघ्वक्षरसंज्ञा ( ) इत्याधुनिकैरङ्गीकृतम् । एतदनुसारेणैव, अस्मिन् ग्रन्थे गुरुलघुसंज्ञे विहिते । एते संज्ञे प्रस्तारोपयोगिन्यौ सांकेतिकरेखाविशेषरूपे ॥

वृत्तं पुनर्द्विविधं—गणवृत्तं मात्रावृत्तं चेति । गुरुलघ्वात्मकत्र्यक्षरसमुदयो गणः । स च—म (– – –), य (ऽ – –), र (– ऽ –) स (ऽ ऽ –), त (– – ऽ), ज (ऽ – ऽ), भ (– ऽ ऽ), न (ऽ ऽ ऽ), इति त्र्यक्षरप्रस्तारतत्वमर्यादया अष्टधा समुत्पद्यते । (प्रस्तारतत्वं प्रथमे अनुबन्धे द्रष्टव्यं) । लगक्रियामन्तरेणापि बालानां सुलभबोधाय अन्यथा निर्दिष्टश्लोकोऽपि ग्राह्यः ॥

'आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवौ ॥'

इति । मात्रावृत्तेषु मात्राचतुष्टयस्य गण इति नियमः । स च, (— —) गुरुद्वयोपेतः, — ᴗ ᴗ गुरुलघुलघुयुतः, ᴗ ᴗ — लघुलघुगुरुयुक्तः, ᴗ — ᴗ लघुगुरुलघुसहितः, ᴗ ᴗ ᴗ ᴗ लघुचतुष्टयभूतः, इति पञ्चधा भवति ॥

वृत्तस्वरूपम्—

४ वृत्तं पुनर्द्विविधं — गणनिमित्तकं मात्रानिमित्तकंचेति । आद्यं त्रिविधं—समपादवृत्तं अर्धसमपादवृत्तं विषमपादवृत्तं चेति । द्वितीयं जातिरिति व्यवहृतं । तत्र मात्रासंख्यैव पादव्यवस्थापका । आर्यादयः प्रायः चतुष्पदीरूपाः । अन्यत्र द्विपदी, त्रिपदी, चतुष्पदी-पञ्चपदी, षट्पदीत्यादि बहुभेदघटिता वर्तन्ते । परन्तु सर्वेषु पादेषु सममात्रासंख्या अनैकान्तिका । यत्र पादव्यवस्था वा पादेषु मात्राव्यवस्था वा न भवति तत्र गाथेति व्यवहारः । तद्भिन्नानि दण्डकादीनि । गणवृत्तेषु पुनः, यत्र चतुर्षु पादेषु एकरूपा गणसंख्या निर्दिष्टा, तत्र समवृत्तमिति व्यवहारः । अतः एतादृशवृत्तस्य एकपाद एव लक्ष्यतया निर्देष्टुमलं । अर्धसमपादवृत्तेषु, क्व च प्रथमतृतीयपादौ समौ, तद्भिन्नलक्षणावपि द्वितीयचतुर्थपादौ च समौ । क्वचित्प्रथमद्वितीयपादौ समौ, तृतीयचतुर्थपादौ च अन्यथा समौ । कुत्रचित्प्रथमचतुर्थपादौ एकलक्षणकौ, द्वितीयतृतीयपादौ अन्यलक्षणकौ, इति महाकविप्रयोगैर्वेदितव्यं । विषमपादवृत्ते तु चत्वारः पादाश्च भिन्नलक्षणकाः । यत्र पादद्वयमेकलक्षणकं, तस्माद्भिन्नौ परस्परं च भिन्नौ अन्यौ पादौ, तत्रापि विषमपादवृत्तव्यवहार एव । यत्र पुनः पादत्रयं वा पादद्वयं वा पादैकं वा एकलक्षणकं, इतरत् पादैकं वा पादद्वयं वा पादत्रयं वा भिन्नलक्षणकं तत्र उपजातिरिति, अन्योऽवान्तरभेदः ॥

वृत्तसंख्यानिर्णयः—

५ समपादवृत्तसंख्यानिर्णयः प्रस्तारतत्वावधारणाधीनः। तद्विवरणं द्वितीयेऽनुबन्धे निर्दिष्टं । युक्त्या च वृत्तसंख्यानिर्देशस्समुपदिष्टः ॥

यथा—उक्तानामकछन्दसः एकाक्षरपादवृत्तं जायते । तच्च गुरुलघुनिमित्तमाधिकृत्य द्विधा भवति । अतः पादे पादे एक एव गुरुः, अथवा एक एव लघुरिति द्वे वृत्ते समुत्पद्येते । गणिततन्त्रन्तु १×२=२ इति । अत्र पादात्मकमेकमेवाक्षरं, द्वाभ्यां, गुरुलघुभ्यां गुणितं चेत्फलं द्विसंख्याकं भवतीति तात्पर्यम् । तथा अत्युक्ताच्चछन्दसः २×२=४ वृत्तानि जायन्त इत्युक्ते, पूर्ववृत्तफलसंख्या द्वाभ्यां गुणितेति मन्तव्यम् । तथैव मध्यमाच्छन्दसः ४×२=८ अष्टौ वृत्तानि भवन्ति । एवमेवाऽन्यत्रापि, तत्तच्छन्दोजातवृत्तसंख्या, तत्तत्पूर्वच्छन्दोजातवृत्तफलसंख्याया द्वाभ्यां गुणनेन निर्धार्यते । यथा—उत्कृत्यभिधानान्तिमच्छन्दोजातवृत्तसंख्या, द्विगुणिततत्पूर्वच्छन्दोजातवृत्तसंख्येति बोद्धव्यम् । सा च ६,७१,०८,८६४ इति प्रस्तारक्रियानिष्पन्नसंख्यैवेत्यवगन्तव्यम् । परन्तु तेषु त्रीण्येव वृत्तानि प्रयोगे दृश्यन्ते । संकलितानां सर्वेषां वृत्तानां संख्या १३,४२,१७,७२६, इति ॥ अन्योपि क्रमो यथा—$(२)^{१}$, $(२)^{२}$, $(२)^{३}$, ... $(२)^{२६}$, इति । एतद्विवरणमेवं—$(२)^{१}$ इत्यत्र गुरुलघुबोधकद्विसंख्या एकपर्यायेण २×१ इति गुण्यते । $(२)^{२}$ इत्यत्र २×२ इति द्विपर्यायाभ्यां, $(२)^{३}$ इत्यत्र २×२×२ इति त्रिपर्यायैः, एवं क्रमेण $(२)^{२६}$ इत्यत्र २×२×२×२×२×२×२—
×२×२×२×२×२×२×२×२×२×२×२×२×२×२-

×२×२×२×२×२ इति षड्विंशतिपर्यायैः गुणिता सती, प्रस्तार क्रमेण निष्पन्नसंख्यैव भवति ॥

वृत्तानां प्रयोगः—

६ तत्तच्छन्दोजातानां सर्वेषां वृत्तानां प्रयोगो यद्यपि न दृश्यते। तथापि वृत्तसंख्यापरिशोधनेन यानि यावन्ति वृत्तान्यात्मने रोचन्ते, तानि तावन्ति प्रयोक्तुं धीमतां शक्यमेव, न तु तत्राऽसंभवलेशोऽपि विद्यते। यथा—उक्तायां 'ग्श्रीः' इति लक्षणोपेतं श्रीवृत्तं एकमेव केदारपण्डितादिभिरङ्गीकृतं। लक्ष्यं च निर्दिष्टं। तस्मादेव छन्दसो जातस्य एकलघ्वक्षरपादोपेतस्य अन्यवृत्तस्यापि नामलक्षणलक्ष्याण्यपि कल्पयितुं शक्यते। उदाहरणं—तद्वृत्तस्य नाम, 'सु' (समीचीनं, शोभावहं, सुखकरं, वृत्तमिति यावत्)। लक्षणं 'ल्सु' (᧐) इत्युक्ते, ल्+सु इत्यत्र (ल्), एको लघुः, (सु) सुवृत्तस्य लक्षणमिति वेदितव्यं। लक्ष्यं—'क नु। स न॥' इति। ईदृशलक्ष्येषु किमपि अर्थवैशद्यं वा, कापि काव्यसंपद्वा, कोऽपि चमत्कारो वा न भवति, किन्तु एतत् पद्यमपि वचनसरणिमेवानुकरोतीति मत्वा वृत्तग्रन्थकारैः तद्विचारः उपेक्षित इत्यनुमीयते। तावता का हानिः। वृत्तसंख्यानिर्णयावसरे तत्तद्वृत्तप्रयोगविचिकित्सायां, एतादृशप्रयोगस्य अवकाशोऽस्त्येव सुधियां। एवमेवात्युक्ताछन्दोजातवृत्तानि चत्वार्यपि 'गौ स्त्री' इति लक्षणोपेतं स्त्रीवृत्तमेकमेवोदाहृतं। अवशिष्टानां त्रयाणां वृत्तानामपि नामानि कल्पयित्वा लक्ष्यलक्षणमनुसंधातुं शक्यते॥

यथा—

१ इलावृत्तं—'ल्गिला' (᧐ –) ल्+ग्+इला इति, पादे पादे एको लघुः एको गुरुश्च इलावृत्तस्य लक्षणं। 'हरिं भजे। हरं भजे॥' इत्युदाहरणम्॥

२ वारिवृत्तं—'ग्ल्वारि' (–ᴗ) ग्+ल्+वारि इति, एको गुरुः एको लघुश्च वारिवृत्तस्य लक्षणम् । 'भूतिकारि । कर्म किंनु ॥' इत्युदाहरणम् ॥

३ अनुवृत्तं—'ल्लनु' (ᴗᴗ) ल्+ल्+अनु इति द्वौ लघू अनुवृत्तस्य लक्षणम् । (एतच्छन्दसि प्रस्तारक्रमाल्लब्धानि त्रीण्यपि पूर्ववृत्तानि, अनुसृतं अनुगतं वा लघुद्वयात्मकं चतुर्थवृत्तमिति यावत् ।) 'इह सुत । मधु पिब ॥' इत्युदाहरणम् । मध्यमाच्छन्दोजातानां अष्टानामपि वृत्तानां प्रयोगः एतद्ग्रन्थे कृत एव ॥

अतः परं, तत्तच्छन्दोजातानां सर्वेषां वृत्तानां एवं प्रयोगकल्पना साध्याऽपि, न केवलं बुद्धिक्लेशकरी, अपि तु न प्रयोजनावहेत्युपेक्ष्यते । परन्तु यस्य कस्य वा धीमतः केषांचिद्वृत्तानां कल्पने कौतुकमस्ति चेत् स प्रयतेत, तत्प्रयतनं सिद्धत्येव ॥

छन्दश्शास्त्रीयनूतनग्रन्थानामावश्यकता—

८ यथा शास्त्रान्तराणि ग्रन्थबहुलानि, काले काले उपचितानि बहुभिरादृतानि न तथा छन्दश्शास्त्रम् । तत्र वृत्तरत्नाकरछन्दोमञ्जर्यादयः कतिपय एव ग्रन्थाः प्रचारे वर्तन्ते । छन्दोविचितिमुद्दिश्य, ग्रन्थान् रचयितुमुद्युक्ताः कवयः पण्डिता वा विरलाः । छन्दस्तत्वरसास्वादिनश्च विरलतराः । अतोऽत्र किञ्चिद्वाग्देवतासेवा अवश्यं कार्येत्यासीत्काचिच्चोदना ॥

एकाक्षरपादवृत्तादिसप्ताक्षरपादवृत्तपर्यन्तं, वृत्तानां प्रयोगः प्रायो न बहुलः । तथा द्वाविंशाक्षरपादवृत्तादिषड्विंशाक्षरपादवृत्तपर्यन्तं वृत्तानि शास्त्रे निर्दिष्टान्यपि तेषां प्रयोगः प्रायशः क्वाचित्कः । तत्त-

त्रापि कश्चिद्युद्यमः कार्य इत्यपरोऽभिसन्धिः । एतद्ग्रन्थरचनाव्याजेन बालानां नीतिधर्मबोधः, दैवभक्तिः, आत्मतत्वज्ञानं, कर्तव्यकर्माभिरुचिरित्यादि सुगुणाः यथामति बोधनीयाः इत्यन्या काचिदाशा । एतादृशसङ्कल्पविशेषचोदनया एतन्नूतनग्रन्थारम्भस्समादृतः ॥

प्रकृतग्रन्थविचारः—

८ सर्वसमवृत्तविचार एवात्र विषयः । अत्र पिङ्गलनागपण्डितादिभिर्दर्शितमार्गेण केदारपण्डितादिभिर्निर्दिष्टानि वृत्तानां लक्षणान्युररीकृतानि । परन्तु लक्ष्योदाहरणविषये स्वप्रतिभानुगुणा अन्तःकरणप्रवृत्तिः निरर्गलमुदिता प्रसृता प्रकाशिता वर्तते । वृत्तलक्षणनिर्देशावसरे, तत्तद्वृत्तस्य प्रस्तारयतिगणविवरणानि प्रदर्शितानि । वृत्तप्रस्तारसङ्ख्याद्यवबोधकाः केचिदनुबन्धा निबद्धाः । तत्तद्वृत्तपादाक्षरसङ्ख्यया लोके सुविदितानां त्रिमूर्ति—चतुर्वेद — पञ्चमहाभूत — षड्तु — सप्तवर्णाष्टवस्वेकादशरुद्र— द्वादशादित्यादीनां स्वरूपादीनि यथाशास्त्रमुपवर्णितानि । एषैवास्य ग्रन्थस्य मर्यादा ॥

ग्रन्थकर्त्रभिसन्धिः—

९ संस्कृतभाषायां, सर्वशास्त्रेषु सर्वतोमुखविषयानुद्दिश्य नवनवा ग्रन्थास्समुदिता दिने दिने सर्वत्र प्रसिद्धा भवेयुरिति प्रत्याशा मामनवरतमावृणोति । अतः—

'सांस्कृत्यां नवरीतिरञ्जितकृतिस्पर्धा कवीनश्नुतात् ।'

इति कवेराशयं सम्यगालोच्य संख्यावन्तः केचिदितोप्युत्तमतरान्नूतनग्रन्थान् सङ्घ्यापयेयुर्यदि, तदा मन्मानसोल्लासः परां काष्ठां भजत इति भृशं मे निश्चयः । अध्येतारो, बोद्धारो, विमर्शकाराश्च अस्मिन् ग्रन्थे विद्यमानान् दोषानार्जवेन संस्कृत्य, गुणानौदार्येणाभिनन्द्य, नैज-

श्रद्धाप्रीत्यादृतमिदं मत्प्रयतनं सफलीकुर्युरिति मुहुर्मुहुस्सादरमुदीक्षे । एवं प्राचीनाधुनिकपण्डितप्रमुखान् सगौरवमभिवन्द्य, विविधशक्तिप्रभावमहिमोपात्तदेवताविशेषान्निर्विशेषं संस्तुत्य, एतादृशारम्भेणान्तःकरणशुद्ध्यापादनद्वारा तत्वशोधने, तत्वचिन्तने, तत्वबोधने च प्रज्ञां मे समुज्ज्वलयतु भगवान्सर्वात्मकः परमेश्वर इति श्रद्धाभक्तिपुरस्सरं तमेवाऽनन्यमनसा संप्रार्थये ॥

बहुधान्याषाढासितदशमी,
गुरुवासरः, (१९३८).

श्रीवेङ्कटरमणार्यः,
ग्रन्थकर्ता.

॥ श्रीसरस्वत्यैनमः ॥

सर्वसमवृत्तप्रभावः.

ध्यात्वा छन्दोमयीं देवीं शब्दशक्तिस्वरूपिणीम् ।
समवृत्तप्रभावाख्यां रचयामि कृतिं शुभाम् ॥

लघुचिह्नम् ᴗ   गुरुचिह्नम् –

(विशेषविषयाववोधाय दृश्यतामुपोद्घातः)

संख्या   छन्दः   वृत्तम्, लक्षणम्, प्रस्तारः, विवरणम्.

१ उक्तायाम्—१ श्रीवृत्तम्, ग्श्रीः, (–) एको गुरुः ।

उदाहरणानि

१ श्रीर्माम् । अव्यात् ॥

२ गीर्माम् । पायात् ॥

३ धीर्मे । भायात् ॥

(परमात्मा एक एव)

४ एकः । देवः ॥

२ अत्युक्तायाम्—१ स्त्रीवृत्तम्, गौस्त्री, (– –) द्वौ गुरू ।

उदाहरणानि

(एकं तत्त्वं—यथा अद्वैते)

१ सत्यम् ज्ञानम् । ब्रह्माऽनन्तम् ॥

२ आत्मैकश्चित् । नित्यश्शुद्धः ॥

(द्वितत्त्वे—यथासांख्ये)

३ आत्माऽव्यक्तम् । सांख्ये द्वे स्तः ॥

३ मध्यायाम्—१ नारीवृत्तम्, मो नारी, (– – –) मगणः ।

उदाहरणे

१ मां पायाल्लोकेशः । भक्तानां भक्तोऽहम् ॥

(त्रिमूर्तयः)

२ ब्रह्माद्यो विष्णुर्माम् । ईशोऽसौ संरक्षेत् ॥

२ मृगीवृत्तम्, रोमृगी, (– ᴗ –), रगणः ।

उदाहरणम्

१ माधवोमाधवौ । गीर्धवश्श्रीप्रदाः ॥

अत्र विशेषाः—अष्टगणान्यतमकेवलगणवृत्तानि—यथा—

१ आदिलघुः—यगणः (ᴗ – –)

उ.—मुरारिः पुरारिः । पुरारिर्मुरारिः ॥

२ मध्यलघुः—रगणः (– ᴗ –)

उ.—स्वस्ति ते ब्रह्मणे । विष्णवे शंभवे ॥

३ अंत्यलघुः—तगणः (– – ᴗ)

उ.—त्वामेव संस्तौमि । मां पाहि सर्वेश ॥

४ सर्वलघुः—नगणः (ᴗ ᴗ ᴗ)

उ.—सदिदमिति हि । मनसि कलय ॥

५ आदिगुरुः—भगणः (– ᴗ ᴗ)

उ.—जन्मनि जन्मनि । ब्रह्म विभावय ॥

६ मध्यगुरुः—जगणः (ᴗ – ᴗ)

उ.—जनार्तिहराय । भजाम सुजन्म ॥

७ अन्त्यगुरुः—सगणः (ᴗ ᴗ –)

उ.—सुखदं हितदम् । भजतामयनम् ॥

८ सर्वगुरुः—मगणः (– – –)

उ.—श्रीकान्तं श्रीका[1]न्तं । मन्दोऽहं वन्दे त्वाम् ॥

४ प्रतिष्ठायाम्—

१ कन्यावृत्तम्—म्गौ चेत्कन्या (— — — —) मगणः गुरुश्च ।

उ.—१ मोक्षापेक्षा स्याच्चेद्भ्रातः । संसारेऽस्मिन् सक्तो मा भूः ॥

चतुर्विध पुरुषार्थाः

२ धर्मश्चार्थः कामो मोक्षः । चत्वारस्ते सर्वैर्लभ्याः ॥

५ सुप्रतिष्ठायाम्—

१ पङ्क्तिवृत्तम्—भ्गौगिति पङ्क्तिः (— ∪ ∪ — — भगणः द्वौगुरू ।

उ.—१ आत्मसुदीपो राजति देहे। यावति काले तावति चेष्टा ॥

पञ्चमहाभूतानि

२ खानिलतेजोनीरधराख्यैः । प्राकृतभूतैः पञ्चकमाहुः ॥

६ गायत्र्याम्—

१ तनुमध्या—त्यौ स्तस्तनुमध्या । (— — ∪ ∪ — —) तगणयगणौ ।

उ.—स्वात्मानमजं त्वं मत्वाऽऽशु सुखी स्याः ।
नो चेदिह दुःखं बाधेत भृशं त्वाम् ॥

२ शशिवदना—शशिवदना न्यौ । (∪ ∪ ∪ ∪ — —) नगणयगणौ ।

---

[1] श्रीकान्तम् = नीलकंठम्.

उ.—भव गुण[1]धामा विनयसुधामा ।
श्रुतिसुमदामा स्मृतिहितदामा[2] ॥

३ वसुमती—त्सौ चेद्वसुमती । (– – ∪ ∪ ∪ –) तगणसगणौ ।

उ.—विद्या सुखकरी बुद्धिर्धृतिकरी ।
शक्तिर्जयकरी भक्तिः प्रियकरी ॥

४ विद्युल्लेखा-विद्युल्लेखा मोमः । (– – – – – –) मगणमगणौ ।

उ.—देवानां देवो यो भक्त्याऽहं तं सेवे ।
हार्दोऽयं दृष्टश्चेत्सर्वं मे सिद्धं स्यात् ॥

५ सोमराजी—द्विया सोमराजी । (∪ – – ∪ – –) यगणयगणौ ।

उ.—१ स्तुवे सोमराजं श्रये श्रीविराजम् ।
दधे देवराजं ह्वये हृद्विराजम् ॥

उ.—२ (षड्तवः) ॥
वसन्तो निदाघोऽथ वर्षाश्शरत्स्युः ।
सहेमन्तकोऽन्यस्तथा शैशिरर्तुः ॥

५ उष्णिहि—

१ मदलेखा—म्सौ गस्स्यान्मदलेखा । (– – – ∪ ∪ – –) मगणसगणौ गुरुश्च ।

बाल्यकार्यम्

उ.—१ बाल्ये त्वं तनुविद्यां पुष्य त्वं तव गात्रम् ।
व्यायामाद्भव हृष्टो धीशक्तिं कुरु शस्ताम् ॥

शक्रधनुषि सप्तवर्णाः

२ शुक्ले सप्त सुवर्णा रक्तोऽसावरुणोऽयम् ।
पीतोऽसौ हरितस्स्युर्नीलश्यामलपिंगाः ॥

---

[1] गुण एव धाम यस्य सः । [2] स्मृत्युक्तानां हितानां दामा मालाभूतः । अथवा स्मृत्युक्तानि हितकराणि दामानि—दानानि (वराणि वा) यस्य सः ।

सप्तर्षयः

३ स्तोष्ये कश्यपविश्वामित्रौ गौतममत्रिम् ।
भारध्वाजवसिष्टौ सप्तर्षीन् जमदग्निम् ॥

२ मधुमती—मधुमती ननगाः । (ᴗ ᴗ ᴗ ᴗ ᴗ ᴗ –) नगणनगणौ गुरुश्च ।

यौवनकार्यम्

उ.—धनचयमधिकं नय तव सुखदम् ।
भव बहुसुयशा हितकुशलयुवा ॥

३ कुमारललिता—कुमारललिता ज्सगाः । (ᴗ – ᴗ ᴗ ᴗ – –) जगणसगणौ गुरुश्च ।

कौमारकार्यम्[1]

कुमारगतिकाले कुमारकुलयुक्तः ।
स्वधर्मनिरतस्त्वं सुकर्मफलभाक्स्याः ॥

४ हंसमाला—सरगा हंसमाला । (ᴗ ᴗ – – ᴗ – –) सगणरगणौ गुरुश्च ।

वार्धिक्यकार्यम्

उ.—समये जीर्णगात्रे सुसमो बन्धुवर्गे ।
सुरभूदेवसेवां कुरु तत्त्वार्थचिन्ताम् ॥

७ अनुष्टुभि—

१ चित्रपदा—भौगिति चित्रपदागः ।(– ᴗ ᴗ – ᴗ ᴗ – –) भगणभगणौ द्वौ गुरू ।

नवग्रहस्तोत्रम्

उ.—सूर्यः—

भास्कर भासय बुद्धिं लोकतमो हर सिद्धिम् ।
शाधि समाहितकार्ये त्वं ग्रहमण्डलधुर्यः ॥

---

[1] यौवनादनन्तरं वार्धिक्यात्पूर्वं यः कालः स कुमारगतिकालः, कुमारप्राप्तिकाल इत्यर्थः ।

२ विद्युन्माला—मो मो गो गो विद्युन्माला (— — — — — — — —) मगणमगणौ द्वौ गुरू ।

उ.—चन्द्रः—

ऋक्षेश त्वं मित्रात्ताभो नष्टस्तापः कौमुद्या ते ।
आर्द्रं कुर्यास्स्वान्तं नित्यं वंशं लोकं कारुण्यात्त्वम् ॥

३ माणवकम्—माणवकं भात्तलगाः (— ᴗ ᴗ — — ᴗ ᴗ —) भगण तगणौ लघुः गुरुश्च ।

उ.—मङ्गलः—

मङ्गलदो भूज सदा सूर्यसखस्सोमहितः ।
युद्धविदां सिद्धिकरश्शुद्धहृदां शं कुरु भो ॥

४ हंसरुतम्—म्नौ गौ हंसरुतमेतत् (— — — ᴗ ᴗ ᴗ — —) भगणनगणौ द्वौ गुरू ।

उ.—बुधः—

सौम्यस्त्वं बुध महात्मा प्रज्ञां मे तनु विशालाम् ।
सौम्यं ते शुभफलत्वं साधूक्तं ग्रहसुयोगे ॥

५ समानिका—जौं समानिका गलौ च । (— ᴗ — ᴗ — ᴗ — ᴗ) रगणजगणौ गुरुः लघुश्च ।

उ.—गुरुः—

जीव देव विद्वदार्य गीर्मुखादिजीवितेश ।
त्वं ममापि जीवहेतुरिष्टसिद्धिदो भवाऽऽशु ॥

६ प्रमाणिका—प्रमाणिका जरौ लगौ । (ᴗ — ᴗ — ᴗ — ᴗ — जगणरगणौ लघुः गुरुश्च ।

उ.—शुक्रः—

कवे कवित्वशिक्षणं भवेत्प्रसादतोऽत्र ते ।
प्रणौमि भक्तिभावतो गुरुप्रभाववान्गुरो ॥

७ वितानम्—वितानमेभ्यो यदन्यत्। जतौ वितानं गुरू-स्यात्। (υ – υ – – υ – –) जगणतगणौ द्वौ गुरू।

उ.—शनिः—

शने शनैर्मे दयालो शमं प्रदेहि स्थिरं त्वम्।
स्थिरां श्रियं त्वं प्रसादात्सदा तनोषि प्रियानाम्॥

८ नाराचिका—नाराचिका तरौ लगौ। (– – υ – υ – υ –) तगणरगणौ लघुः गुरुश्च।

उ.—राहुः—

राहो बलं प्रदेहि मे देहे मतौ त्वमत्र भो।
द्वेषस्सभूतजार्कगो नात्मार्कतत्वविस्परः॥

९. कबरी—त्जौ ल्गौ यदि सा कबरी। (– – υ υ – υ υ –) तगणजगणौ लघुः गुरुश्च।

उ.—केतुः—

केतो कुशलं स्वकुले जातो भवतो भजते।
ज्ञानं तनु मे भजतो ध्यानं करवाणि मुदा॥

१० श्लोकः—पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठं गुरु विजानीयादेतच्छोकस्य लक्षणम्। (υ υ υ υ υ υ υ υ। υ υ υ υ υ – υ υ)=पूर्वार्धम्। एवं उत्तरार्धम्॥

उ.—अष्टवसवः—

१ ध्रुवोऽथ[1]वा धरो द्रोणो ह्यग्निर्वास्तुः प्रभाववान्।
तथैव पंचमः प्रोक्तः प्रत्यूष[2]श्च विभावसुः॥
२ दोष[3]स्सोम इति ख्यातः षष्ठः प्राणोऽथ सप्तमः।
आपो[4] वार्कोऽष्टमश्चेति वसवो ह्यष्ट ईरिताः॥

---

[1] प्रथमस्य वसोः—ध्रुव इति धर इति वा संज्ञा. [2] पंचमस्य—प्रत्यूष इति विभावसुरिति वा संज्ञा. [3] षष्ठस्य—दोष इति सोम इति वा संज्ञा. [4] अष्टमस्य—आप इति अर्क इति वा संज्ञा.

३.—गणेशः—

गणेशं नौमि भक्त्याहं भवबन्धविमुक्तये ।
संपूजितस्सुराद्यैर्यस्स्वस्वकार्यार्थसिद्धये ॥

११ गजगतिः—नभलगा गजगतिः । (⏑ ⏑ ⏑ — ⏑ ⏑ ⏑ —) नगणभगणौ लघुः गुरुश्च ।

उ.—गजमुखे त्वयि रतिः प्रियकरा हितकरा ।
मतिकरा धृतिकरा भवतु सा भवज मे ॥

९. बृहत्याम्—

१ हलमुखी—रान्नसाविह हलमुखी । (— ⏑ — ⏑ ⏑ ⏑ ⏑ ⏑ —) रगणनगणसगणाः ॥

विघ्नराजपदकमले संततं तव सुखनिधे ।
भृंगराजकलितदशां मस्तकं मम वहतु भोः ॥

२ भुजगशिशुसृता—भुजगशिशुसृता नौमः । (⏑ ⏑ ⏑ ⏑ ⏑ ⏑ — — —) नगणनगणमगणाः ॥

जयति भवति देवं त्वां भजति जगति लोकोऽयम् ।
अखिलवयसि सम्मोदात्सकलमनसि भास्वन्तम् ॥

३ भुजङ्गसङ्गता—सजरैर्भुजङ्गसङ्गता । (⏑ ⏑ — ⏑ — ⏑ — ⏑ —) सगणजगणरगणाः ॥

निजवैभवात्तविग्रहं जितदुःखसर्पभूषणम् ।
मतिमूषकात्तवाहनं हितवारणास्यमाश्रये ॥

४ मणिमध्यम्—स्यान्मणिमध्यं चेद्भमसाः । (— ⏑ ⏑ — — — ⏑ ⏑ —) भगणमगणसगणाः ॥

१ लोकविडंबं मा कुरु भोश्शोकदवाग्निं वारय भोः ।
ज्ञानविमूढं शिक्षय भो मानसमान्ध्यं नाशय भोः ॥

२.—नवरत्नानि—

वज्रमणिर्वैडूर्यमणिः पद्ममणिर्माणिक्यमणिः ।
मारकतं गोमेधिककं विद्रुममुक्तानीलरुचः ॥

३.—नवग्रहाः—

सूर्यहिमांशू भूमिसुतस्सोमजजीवौ काव्यसुधीः ।
सूर्यजराहू केतुरिति स्याद्ग्रहसंख्या सा नवका ॥

१० पङ्क्त्याम्—

१ सुमुखी—सस्जास्सुमुखी मता गुरुः । (∪∪—∪∪—∪—∪—) सगणसगणजगणाः गुरुश्च ॥

१ सुबलस्सबलो विभो प्रभो वरदस्सुखदो यतस्सताम् ।
सफलं कुरु भो मयाऽऽद्दतं सकलं सुकृतं कृतं हितम् ॥

दशेन्द्रियाणि—

२ नयनं श्रवणं दृशि ध्वनौ
रसना च नसा रुचौ मतौ ।
त्वगपि स्पृशतिक्रियाविधौ
धिषणेन्द्रियपञ्चकं विदुः ॥

३ वदनाद्वचनं करैर्हृतिश्चरणाद्गतिरप्यधोमुखे ।
परतस्सरणं पुरस्सुखं सहितानि दशेन्द्रियाणि तैः ॥

२ शुद्धविराट्—म्सौ ज्गौ शुद्धविराडिदं मतम् । (———∪∪—∪—∪—) मगणसगणजगणाः गुरुश्च ॥

विष्वक्सेनः—

विष्वक्सेनमुपास्महे सदा विष्वग्भीतिविदारकं मुदा ।
विष्वग्विघ्ननिवारणं जनैर्विष्वक्कार्यमुखे त्वमर्च्यसे ॥

३ पणवम्—म्नौ ज्गौ चेति पणवनामकम् ।(– – – ∪ ∪ ∪ ∪ – ∪ –) मगणनगणजगणाः गुरुश्च ॥

विष्वक्सेन भृशमुपास्यसे भक्त्याविष्टवरजनैस्सदा ।
सेनानीस्स गणपतिस्तथा कार्यार्थं त्वमखिलसिद्धिदः॥

४ मयूरसारिणी—जौ रगौ मयूरसारिणी स्यात् । (– ∪ – ∪ – ∪ – ∪ – –) रगणजगणरगणाः गुरुश्च ॥

पञ्च महाभूतानि.

उ.—पृथ्वी—

भूरसानलानिलाभ्रयुक्ता मातृवत्समा समानरागात् ।
भूतजातपालनक्षमा त्वं भासि सस्यरत्नगर्भधाम्ना ॥

५ रुक्मवती—भ्मौ सगयुक्ता रुक्मवतीयम्—(– ∪ ∪ – – – ∪ ∪ – –) भगणमगणसगणाः गुरुश्च ।

उ.—आपः—

आदिमसृष्टा वृष्टिजलाढ्या
पोषणमाता भूतहिता त्वम्[1] ।
सस्यजनानां पक्षिपशूनां
प्राणनकर्त्री लोकविधात्री ॥

६ मत्ता—मत्ता ज्ञेया मभसगयुक्ता। (– – – – ∪ ∪ ∪ ∪ – –) मगणभगणसगणाः गुरुश्च ॥

उ.—तेजः—

सूर्यश्चन्द्रोऽग्निरिति च बुद्धं
ज्योतीरूपं मतिगतिभासम् ।

---

[1] जलाभिमानदेवता.

चेतश्शक्तिं बहुविधशक्तिं

ध्यायामि त्वां भृशमसुतत्त्वम् ॥

७ मनोरमा—नरजगैर्भवेन्मनोरमा । (‿‿‿—‿—‿—‿—) नगणरगणजगणाः गुरुश्च ॥

उ.—वायुः—

अनिलतत्त्वमाश्रये मुदा सकलभूतधारणक्षमम् ।

ध्वनिगतिक्रमाश्रयं सदा गतिरिति प्रपञ्चकारणम् ॥

८ चम्पकमाला—चम्पकमाला चेद्भमसागः । (—‿‿——— ‿‿——)भगणमगणसगणाः गुरुश्च ॥

उ.—आकाशः—

चित्प्रथमाविर्भूतविभूतिं सर्वगमाकाशाख्यसुतत्त्वम् ।

शब्दविभासे कारणमाद्यं मद्हृदयेशं त्वां परिसेवे ॥

९ त्वरितगतिः—त्वरितगतिश्च नजनगैः । (‿‿‿‿—‿‿‿‿ —) नगणजगणनगणाः गुरुश्च ॥

उ.—आत्मा—

जनयति यो गगनमरुद्द्युतिजलभूमुखमखिलम् ।

प्रकृतिवशान्मनसि कृतं सुखजलधिं वृणु हृदि तम् ॥

११ त्रिष्टुभि—

१ उपस्थिता—त्जौ ज्गौ गुरुणेयमुपस्थिता स्यात् । (—— ‿‿—‿‿—‿——) तगणजगणजगणाः गुरुद्वयं च ॥

उ.—त्रयस्त्रिंशद्देवतारहस्यम्—

चिद्वस्तु गुणाद्भवतीश्वराख्यो

मूर्तित्रयमित्यथ भूरि देवाः ।

त्रिंशत्सहितास्त्रय इत्यनन्ता-

स्तद्दैवतकं विदितं रहस्यम् ॥

२ इन्द्रवज्रा—स्यादिन्द्रवज्रा यदि तौ जगौ गः। (––∪––∪∪–∪––) तगणतगणजगणाः गुरुद्वयं च ॥

उ.—अष्टवसवः, एकादशरुद्राः, द्वादशादित्याः, इन्द्रः, प्रजापतिः—

तत्राष्ट देवा वसुरूपभाजो
रुद्रास्तथैकादश देवरूपाः ।
तद्द्वादशादित्यवरेण्यरूपा
इन्द्रः प्रजापत्यभिधानदेवः ॥

३ उपेन्द्रवज्रा—उपेन्द्रवज्रा जतजास्ततो गौ। (∪–∪––∪∪–∪––) जगणतगणजगणाः गुरुद्वयं च ॥

अष्टवसवः

वसुश्चिदाभासकृतादिशक्ति-
र्वरा सुताऽभूद्दृषिकाश्यपस्य ।
सधर्मिणी सा वरधर्मपत्नी
तयाऽभवन्द्रोणमुखाष्टपुत्राः ॥

४ उपजातिः—इन्द्रोपेन्द्रवज्रयोः संसृष्टभिन्नपादरूपा ॥

उ.—१ द्रोणः—

द्रोणोऽधरो वा प्रथमो वसूनां
मनोहरा वाऽभिमतिर्हि भार्या ।
तयोश्च सङ्गात्खलु जज्ञिरे ते
हर्षो भयं शोकमुखाश्च भावाः ॥

उ.—२ प्राणः—

तथाऽनिलः प्राणवसुर्द्वितीय-
स्सोर्जस्वतीऽवास्य शिवाऽस्ति भार्या ।

पुरोजवोऽसौ सहसायुराभ्यां
जातावविज्ञातगतिर्द्वितीयः ॥

५ सुमुखी—नजजलगैर्गदिता सुमुखी । (∪∪∪∪—∪∪—∪∪—) नगणजगणजगणाः लघुर्गुरुश्च ॥

उ.—३ ध्रुवः—

ध्रुव इति नाम तृतीयवसु-
र्भवति पतिस्स हि धारणया ॥
पुर इति काल इतीष्टसुतं
सकलगतेः करणं भजते ॥

६ दोधकम्—दोधकवृत्तमिदं भभभागौ । (—∪∪—∪∪—∪∪——) भगणभगणभगणाः गुरुद्वयं च ।

४—अर्कः—

अर्कचतुर्थवसुर्ह्यथवाऽप-
स्तेन हि वासनया जनितास्ते ।
हर्षमुखा गदिता जनिकार्याः
कर्मशताश्रयभावविशेषाः ॥

७ शालिनी—शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः । (————।—∪——∪——) मगणतगणतगणाःगुरुद्वयं च। चतुर्भिस्सप्तभिर्यतिः ।

५—अग्निः—

अग्निश्शुद्धः पंचमो वाऽनलोऽसौ
धारा भार्या तस्य शाखो विशाखः ।
पुत्रा आसन् नैगमेयस्त्रयोऽथ
ज्येष्ठो भ्राता द्राविणो वा कुमारः ॥

८ वातोर्मी—वातोर्मीयं कथिता म्भौ तगौ गः। (– – – – ∪∪ – – ∪ – –) मगणभगणतगणाः गुरुद्वयं च।

६.—दोषः—

दोषष्षष्ठोऽस्ति वसुस्सोमनामा
भार्यानाम्ना कथिता शर्वरी सा।
तस्याः पुत्रो विदितस्सोऽपि वर्चा
वर्चस्वी वाऽवरजाश्शिशुमारः॥

९ भ्रमरविलसितम्—म्भौ न्लौ गस्स्याद्भ्रमरविलसितम्। (– – – – ∪∪∪∪∪∪ –) मगणभगणनगणाः लघुः गुरुश्च।

७.—वास्तुः—

वास्तुर्यस्सप्तमवसुरथवा
प्रा[1]दिर्भासोंऽगिरस उदरतः।
[2]जाता भार्या तदुभयतनयो
वि[3]श्वकर्माऽस्य स इति विदितः॥

१० रथोद्धता—रान्नराविति रथोद्धता लगौ। (– ∪ – ∪∪∪ – ∪ – ∪ –) रगणनगणरगणाः लघुः गुरुश्च।

८ विभावसुः—

अष्टमो वसुरसौ बिभावसुः
प्र[4]त्युषापतिरयं प्रभाववान्।
व्युष्टरोचिषसुतौ तथा[5]ऽऽ तपो
देवलो जयति सर्व भासकः॥

११ स्वागतम्—स्वागतेति रनभागुरुयुग्मम्। (– ∪ – ∪∪∪ – ∪∪ – –) रगणनगणभगणाः गुरुद्वयं च।

---

[1] प्रभासः. [2] आंगीरसी. [3] विश्वकर्मा. [4] प्रत्यूषः. [5] आतपनः.

१ चिन्मयाज्जगदिदं वसुरूपा-
च्छक्तितो विलसति प्रभयात्तम् ।
नौम्यहं प्रतिदिनं सवसन्तम्
चिन्मयं हृदिशयं पुरुषं त्वाम् ॥

२ भारते प्रकरणादियमुक्ता
दानधर्मविषयादनुकृष्टा ।
आदृता वसुकथा ननु देवी-
तत्त्वबोधपरभागवतोक्ता ॥

३ उक्तमेव वरतैत्तिरशाखाऽ-
रण्यभाग इदमद्भुततत्त्वम् ।
सूर्यरूपवसुदेवमहिम्ना
कालदिक्परतया बहुधाऽलम् ॥

४ एकतोऽधिक कृता दशरुद्रा
एवमेव पुरतोऽभिहितास्युः ।
भारतादिगतनामविशेषै-
र्बुद्धिगोचरसदर्थमुपात्तैः ॥

१२ वृत्ता—ननसगगुरुरचिता वृत्ता। (ᴗᴗᴗᴗᴗᴗᴗᴗᴗ———)
नगणनगणसगणाः गुरुद्वयं च ॥

एकादशरुद्राः

१ अजः—

अज इति विदुरिह रुद्रं त्वां
न भजसि जनिमिति यस्मात्त्वम् ।
प्रभवसि जगदलमुत्स्रष्टुं
स्थितिपदगतमिदमाहर्तुम् ॥

१३ पृथ्वी—ननभगगुरुगैरथपृथ्वी । (⏑⏑⏑⏑⏑⏑–⏑⏑––) नगणनगणभगणाः गुरुद्वयं च ॥

२ एकपात्—

जगदिदमखिलं तव पादो
विलससि बहुधैकसुपात्त्वम् ।
सुखमयमथ तत्रिपदं ते
भवगतजनताशरणेऽलम् ॥

१४ भद्रिका—ननरलगुरुभिश्च भद्रिका । (⏑⏑⏑⏑⏑⏑–⏑–⏑–) नगणनगणरगणाः लघुः गुरुश्च ॥

[1] भव तवकरुणाऽस्ति चेत्प्रभो
धरति हि मृदुलाऽत्र भद्रिका ।
गुरुनयनपदं तृतीयकम्
गुरुबलमिति चित्रवृत्तजम् ॥

१५ चित्रवृत्ता—ननतगगुरुभिश्च चित्रवृत्ता । (⏑⏑⏑⏑⏑⏑––⏑––) नगणनगणतगणाः गुरुद्वयं च ॥

३ अहिर्बुध्नचः—

अवसि जगदहिर्बु[2]ध्नचदेवो
दिविषदभिनुतस्त्वं हि लोके ।
स्थिरचरनिचयास्त्वत्प्रसादात्
स्थितिगतिभरणे स्स्युस्सुशक्ताः ॥

१६ श्येनिका—श्येनिका रजौ रलौ गुरुर्यदा (–⏑–⏑–⏑–⏑–⏑–) रगणजगणरगणाः लघुः गुरुश्च ॥

---

[1] भद्रिकावृत्ते अहिर्बुध्न्यपदसमावेशस्यानुपपत्त्या तत्पदं तदनन्तरीयाचित्रवृत्ते-समावेशितं वर्तते इति तात्पर्यं, कविना सचमत्कारमुत्प्रेक्षितम्. [2] अहिर्ब्रध्न., अहिर्बुध्नः अहिर्ब्रध्न्यः अहिर्बुध्न्यः इति रूपं.

त्वं हि देव ईश्वरो पदद्वया-
त्कालकूटधारणादहिस्स्मृतः ।
बृंहसि स्वयं जगत्रयात्मना
तेन बुध्नय इत्यपीह कथ्यसे ।

१७ मौक्तिकमाला—मौक्तिकमाला यदि भतना गौ । (–⏑⏑ ––⏑⏑⏑⏑––) भगणतगणनगणाः गुरुद्वयं च ॥

४ विरूपाक्षः—
रुद्रगणेषु त्वमसि बलिष्ठो
नौमि विरूपाक्ष तव पदाब्जे ।
बन्धविमुक्तौ दुरितविदाहे
कारणमक्षित्रयमिति सेवे ॥

१८ श्रीवृत्तम्—पंचरसैश्श्रीर्भतनगगैस्स्यात् (–⏑⏑––।⏑ ⏑⏑⏑––) भगणतगणनगणाः गुरुद्वयं च । पञ्चभिष्षड्भिर्यतिः ॥

५ सुरेश्वरः—
पंचमरुद्रं मुनिगणसेव्यं
स्वात्मनि देवं भजत सुरेशम् ।
रैवतसंज्ञं सुखमयरूपं
कालविदूरं शुभमति शीलम् ॥

१९. उपस्थितम्—उपस्थितमिदं ज्सौ ताद्गकारौ । (⏑–⏑⏑ ⏑–––⏑––) जगणसगणतगणाः गुरुद्वयं च ॥

६ जयन्तः—
जगत्रयमिदं धत्ते जयन्तः
पुरत्रयवधे देवाः कियन्तः ।
दिनत्रयममुं ये ते भजन्ते
गुणत्रयकृतं शोकं कषन्ते ॥

२० सम्मता—नरयुगं भवेत्सम्मता लगौ। (‿‿‿—‿—— ‿—‿—) नगणरगणरगणाः लघुः गुरुश्च ॥

७ बहुरूपः—

स बहुरूपभाक् योऽस्ति सर्वग-
स्सुलभमस्य तद्रूपधारणम्।
अखिलशक्तितो विश्वरूपभाक्
जयति भक्तितस्तं नमाम्यहम् ॥

२१ कुमारी—ययौ यो लगौ चेत्कुमारी मता । (‿——‿— —‿——‿—) यगणयगणयगणाः लघुः गुरुश्च ॥

८ त्र्यंबकः—

समे द्वे सुनेत्रे भजन्ति प्रिया-
त्सुरास्ते न माहात्म्यमेतेषु किम्।
रवीन्दू सुविज्ञानमक्षीणि ते
जगद्भासयन्तीति जानन्ति ते ॥

१२ जगत्याम्—

१ चन्द्रवर्त्म—चन्द्रवर्त्म निगदन्ति रनभसैः। (—‿—‿‿‿ —‿‿‿‿—) रगणनगणभगणसगणाः ॥

९ अपराजितः—

सन्ततं त्वमपराजितपद्भाक्
त्वं न केन परिभूयस इति भोः।
पूज्यसे त्वममरैर्न परिभव-
स्त्वत्पदं हि भजतामुदयति नः ॥

२ वंशस्थम्—जतौ तु वंशस्थमुदीरितं जरौ। (‿—‿—— ‿‿—‿—‿—) जगणतगणजगणरगणाः ॥

१० सावित्र्यः—

नमामि सावित्र्यमुदारतेजसं
जगत्प्रसूतेस्सुनिदानमव्ययम् ।
विभासयत्येतदशेषलौकिकं
स्वतेजसा योऽस्ति चितिस्वरूपवान् ॥

३ इन्द्रवंशा—स्यादिन्द्रवंशा ततजै रसंयुतैः। (— — ᴗ — — ᴗ ᴗ — ᴗ — ᴗ —) तगणतगणजगणरगणाः ॥

११ पिनाकी--

देवो हरो यो भवनाशको निजा-
मध्यास्यमायां सृजति त्रिविष्टपम् ।
प्रेम्णा पिनाकी सकलं बिभर्त्यसौ
भूयस्तथा संहरति स्वलीलया ॥

-पजातिः—वंशस्थेन्द्रवंशवृत्तयोस्संसृष्टभिन्नपादरूपा । (ᴗ — ᴗ — — ᴗ ᴗ — ᴗ — ᴗ — । — — ᴗ — —ᴗ ᴗ — ᴗ — ᴗ —) प्रथमपादे जगणतगणजगणरगणाः द्वितीयपादे तगणतगणजगणरगणाः । एवं उत्तरार्धेपि । अन्यथा वा ॥

उदाहरणानि—

१ जटाधरोक्त्या हि समीरितक्रमा
रुद्रास्त एकादशसंख्यया युताः ।
विशेषनामानि भवन्ति भारते
मात्स्ये पिनाकी स च रैवतो हरः ॥

२ शिवो हरश्शंभुपिनाकिनौ तथा
स्थाणुश्च भर्गो गिरिशस्सदाशिवः ।
कपालिनामेश्वरभैरवौ स्मृता-
स्तेऽन्यैरथैकादशरुद्रसंख्यया ॥

३ आरण्यके तैत्तिरसंज्ञके स्मृता
मरुद्वरा रुद्रगणास्तु सौर्यकाः ।
विद्युत्प्रकाशादिकरा महोज्वला-
स्सदान्तरिक्षे गतितो जगत्कृते ॥

४ प्रभ्राजमाना व्यवदातसंज्ञका
गणास्तथा वास्तुकवैद्युताश्च ते ।
वर्गश्चतुर्थो रजता हि पञ्चमो
गणस्तु नाम्ना परुषा इति स्मृतः ॥

५ श्यामास्तु षष्ठः कपिलाऽतिलोहिता
भवन्ति सप्ताष्टमवर्गभाजिनः ।
ऊर्ध्वाश्चरुद्रा नवमो गणो विदुः
परस्तु वर्गोऽवपतन्तसंज्ञकाः ॥

६ एकादशो वैद्युतनामशालिनां
गणस्स्मृतस्तत्प्रथमप्रपाठके ।
तत्त्वानि तेषां विदितं भवेद्ध्रुवं
विवेकिनां भाष्यविदां महात्मनाम् ॥

४ तोटकम्—इह तोटकमंबुधिसैः कथितम् । (‿‿—‿‿—‿‿—‿‿—) सगणसगणसगणसगणाः ॥

द्वादशादित्याः

हरिवंशमुखादिपुराणकथा-
वचनैर्भणितं श्रुतितत्त्वपरैः ।
इह सूर्यगणं भुवनस्य हितं
विवृणोमि यथामति तत्त्वपरः ॥

५ द्रुतविलंबितम्—द्रुतविलंबितमाह नभौ भरौ । (᳐᳐᳐ – ᳐᳐ – ᳐᳐ – ᳐ –) नगणभगणभगणरगणाः ॥

१ विवस्वान्—

तव विवस्वत आत्मकमौष्ण्यकं
विविधभूतगतं स्थितिहेतुकम् ।
यदि न तद्भवति क्षणमप्यहो
तदनु जीवति किं किमु वर्धते ॥

६ पुटः—मुनिशरविरतिर्नौ म्यौ पुटोऽयम् । (᳐᳐᳐᳐᳐᳐ – । – – ᳐ – –) नगणनगणमगणयगणाः । सप्तभिः पञ्चभिर्यतिः ॥

२ अर्यमा—

द्विदशरविगणे श्रेष्ठो ऽर्यमन् त्वं
यदिह जनिमतामर्थं मिमीषे ।
तदुदयकरणे त्वं जागरूकः
कलयसि सततं तद्वांछितं भोः ॥

७ प्रमुदितवदना—प्रमुदितवदना भवेन्नौ ररौ । (᳐᳐᳐᳐᳐᳐ – ᳐ – – ᳐ –) नगणनगणरगणरगणाः ॥

३ पूषा—

गगनबहुगतिस्त्वमेकर्षिकः
कृतजगदवनो ऽसि पूषाऽऽदरात् ।
अनल इह समो नु किं ते त्विषा
कृषिशरणाहितं स्तुमस्त्वां विभो ॥

८ कुसुमविचित्रा—नयसहितौ न्यौ कुसुमविचित्रा । (᳐᳐᳐᳐ – – ᳐᳐᳐᳐ – –) नगणयगणनगणयगणाः ॥

४ त्वष्टा—

सु[1]रगृहकारी र[2]विकरहारी
रवि[3]कृतसंज्ञस्त्रि[4]शिरस आत्मा ।
हरकृत[5]शूलो हरि[6]कृतचक्रो
लससि खलु त्वं[7]कृतिसमनामा ॥

९. जलोद्धतगतिः—रसैर्जसजसौ जलोद्धतगतिः । (⏑–⏑⏑⏑–। ⏑–⏑⏑⏑–) जगणसगणजगणसगणाः । षड्भिष्षड्भिर्यतिः ॥

५.—सविता—

जगत्प्रसविता त्वमप्प्रसविता
प्रचोदयसि नो धियोऽसि सविता ।
वरेण्यमिति ते शरण्यमिति ते
सुभर्ग इति तज्जपन्ति मनुजाः ॥

---

[1] देवानां प्रासादादि निर्माता. [2] सूर्यस्य किरणान् [तापं] हरतीति [ह्रस्वीकरोतीति]. [3] रविणा—सूर्येण, कृता—दत्ता, संज्ञा [सूर्यस्य पत्नी] येन सः. [4] त्रिशिरसः—तन्नामकस्य, आत्मा—पितृभूतः । त्वष्टुः आत्मैव यो पुत्ररूपेण जातः, स त्रिशिराः । 'आत्मा वै पुत्रनामासि' इति श्रुतेः. [5] हराय कृतः—निर्मितः, शूलः [तन्नामायुधविशेषः] येन सः. [6] हरयेकृतं—निर्मितं, चक्रं [तन्नामायुधविशेषः] येन सः. कृत्या, समं नाम यस्य सः कृतिसमनामा । कृतिः—तक्षणकर्म, तदनुगुणं नाम—'त्वष्टा' इति । यतः—त्वक्ष् धातुः—तक्षणकर्मार्थकः, तस्य तृच् प्रत्यये विहिते, त्वष्टृ इति प्रातिपदिकं भवति । तस्य पुंसि प्रथमैकवचने रूपं त्वष्टा इति । अस्मिन् श्लोके त्रिषु पूर्वेषु पादेषु, अस्य आदित्यरूपान्यतमस्य, यानि कर्माणि निरूपितानि, तानि तक्षणकर्मसाध्यानीति कृत्वा, तत्कर्मानुगुणं नाम प्रकरणमनुसृत्य 'त्वष्टा' इत्यनुमंतव्यं । अस्मिन् वृत्ते गुरुवर्णत्रयापादकस्य त्वष्टृपदस्य समावेशानुपपत्तिं पर्यालोच्य, उपरिनिर्दिष्टार्थः क्लिष्टकल्पनोपि समाधानेनाङ्गीकार्यः ॥

१० भुजङ्गप्रयातम्—भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः । (ᑌ — — ᑌ — — ᑌ — — ᑌ — —) यगणयगणयगणयगणाः ॥

६.—भगः—

भगो ऽसि प्रसिद्धो विवाहादिकार्यं
सुसिद्धं करोषि प्रजानां प्रियं त्वम् ।
सनक्षत्रगत्या षडैश्वर्यशक्त्या
त्वमादित्यतेजो विशेषात्सुरेशः ॥

११ स्रग्विणी । रैश्चतुर्भिर्युता स्रग्विणी सम्मता । (— ᑌ — — ᑌ — — ᑌ — — ᑌ —) रगणरगणरगणरगणाः ॥

७.—धाता—

धातृनामांकितो वायुसंधारणा-
द्रश्मिसंदीपनात्कर्मसंस्थापनात् ।
ब्रह्मवत्सृष्टिकृत्प्राणिनामुद्भिदां
स्थावराणामसि त्वं प्रभो तेजसा ॥

१२ प्रियंवदा—भुवि भवेन्नभजरैः प्रियंवदा । (ᑌᑌᑌ—ᑌᑌᑌ —ᑌ—ᑌ—) नगणभगणजगणरगणाः ॥

८.—विधाता—

दिवि जलं भुवि जलं विधातृतो
हृदि बलं मतिबलं भवेत्सदा ।
अजगतिं हरिकृतिं हराश्रियं
सुविदधत्त्वमुपकृद्विराजसे ॥

१३ मणिमाला—त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः। (— — ᑌᑌ — — । — — — ᑌᑌ — —) तगणयगणतगणयगणाः । षड्भिष्षड्भिर्यतिः ॥

९.—वरुणः—

सत्यानृतदर्शी मर्त्यानवपश्यन्
कालावरकस्त्वं राजाऽस्युदकानाम् ।
मित्रस्य सुयोगान्मैत्रावरुणोक्त्या
वेदे वरुण त्वं देवादिरितीड्यः ॥

१४ ललिता—धीरैरभाणि ललिता तभौ जरौ । (— — ⏑ — ⏑ ⏑ ⏑ — ⏑ — ⏑ —) तगणभगणजगणरगणाः ॥

१०.—मित्रः—

मित्रो हिताय जगतां त्वमेव भो-
श्शक्तो विशेषयजने प्रशस्यसे ।
चक्षुस्समस्तजगतोऽसि तस्थुष-
स्तत्त्वां नमामि सततं सतां हितम् ॥

१५ प्रमिताक्षरा—प्रमिताक्षरा सजससैरुदिता । (⏑ ⏑ — ⏑ — ⏑ ⏑ ⏑ — ⏑ ⏑ —) सगणजगणसगणसगणाः ॥

११.—रविः—

त्वमशेषतो विदितवान्विभवै-
रमरेश्वरो घनपतिर्द्युतिमान् ।
प्रथमो हविर्भुगिति संकलितो
रविरित्यतो निगदितो विबुधैः ॥

१६ ज्वाला—ननभमसहिताऽभिहिता ज्वाला । (⏑ ⏑ ⏑ ⏑ ⏑ ⏑ — ⏑ ⏑ — — —) नगणनगणभगणमगणाः ॥

रविकरवलिता जलधावापो
मरुदनुसरणाद्गगनं प्राप्ताः ।
घनगतिकलिताः कलिता वृष्ट्या
रविमरुदनुगा भुवमायाताः ॥

१७ वैश्वदेवी—पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ । (———— ——।—∪———∪———) मगणमगणयगणयगणाः । पञ्चभिस्सप्तभिर्यतिः ॥

१२.—उरुक्रमः—

आदित्यो नित्यं विक्रमेत स्वयं द्यां
त्रिः प्रातस्सायं मध्यमेऽह्नास्त्रिपादैः ।
शब्दैस्त्वंविष्णूरुक्रमाद्यैः प्रसिद्धो
लोके सर्वे त्वां पूजयन्तेऽति नम्राः ॥

१८ जलधरमाला—अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ । (————।∪∪∪∪—————) मगणभगणसगणमगणाः । चतुर्भिरष्टाभिर्यतिः ॥

द्वादशादित्यानां नामान्तराणि—

पूषा त्वष्टाऽर्यमसवितारौ शक्रो
धाता विष्णुर्वरुणविवस्वान्मित्राः ।
अंशस्सूर्ये खग इति चादित्याख्याः
लोकेष्वाहुर्द्व्यधिकदशात्ता भेदाः ॥

१९ अभिनवमालिका—अभिनवमालिका नजभयैस्स्यात् । (∪∪∪∪—∪—∪∪∪——) नगणजगणभगणयगणाः ॥

महेन्द्रः—

त्रिभुवनपालकोऽसि हि महेन्द्रो
दितिसुतनाशकोऽमरवरेण्यः ।
सुकृतमनोरथान्सुकृतिनस्त्वं
सुयजनशीलिनो नयसि नाकम् ॥

२० प्रभा—स्वरशरविरतिर्ननौ रौ प्रभा । (∪∪∪∪∪∪—। ∪——∪—) नगणनगणरगणरगणाः । सप्तभिः पञ्चभिर्यतिः ॥

प्रजापतिः—

प्रथमजननभाग्विभासिप्रजा-
पतिरमलगुणो भुवामीश्वरः ।
कलयसि मनसा त्रिलोकीं स्वयं
सुरदनुजपिता गतिस्त्वं सताम् ॥

२१ मानिनी—भवति नजाविह मानिनी जरौ । (⏑⏑⏑⏑–⏑⏑–⏑–⏑–) नगणजगणजगणरगणाः ॥

त्रयस्त्रिंशद्देवताः—

जगति हिताः कति देवतास्त्रयो
दश दशतो दशसंयुता विदुः ।
श्रुतिविदिताः खलु तास्सहस्रधा
मतिकुशलास्सुविभाव्य तन्वते ॥

२२ अभिनवतामरसम्—अभिनवतामरसं नजजा यः । (⏑⏑⏑⏑–⏑⏑–⏑⏑––) नगणजगणजगणयगणाः ॥

भवति सदेकमिदं सुविचारे
त्रिविधमथो गुणतोऽजहरीशाः ।
तदनु तदात्मकृतं महिमाप्तं
वसुमरुदर्कगणं बहुधाऽऽहुः ॥

२३ गौरी—नयुगरयुगयुक्च गौरी मता । (⏑⏑⏑⏑⏑⏑–⏑––⏑–) नगणनगणरगणरगणाः ॥

अभिमतशुभलाभयोगाय वा
भयकृदशुभयोगनाशाय वा ।
विविधकृतिवचोभिरेतास्तुता-
स्तदनुगतजनैर्हि वागादयः ॥

२४ ललना—पञ्च मुनौ भ्तौ ससयुता ललना । (– ∪ ∪ – – । ∪ ∪ ∪ – ∪ ∪ –) भगणतगणसगणसगणाः । पञ्चभिस्सप्तभिर्यतिः ॥

सन्ति हि देवा बहुविधा वरदा-
स्तानिह वक्तुं कथमहं प्रयते ।
नाम च रूपं गुणगणान्फलदान्
तत्कृतियत्नो भवति मे विफलः ॥

२५ ललितम्—ललितमभिहितं नौ म्रौ नामतः । (∪ ∪ ∪ ∪ ∪ ∪ – – – – – ∪ –) नगणनगणमगणरगणाः ॥

प्रकटितमहिमा तेष्वेकैकको
विलसति भुवने देवस्येच्छया ।
तदणुरपि न मे बुद्धौ भासते
किमुत जडधिया वक्तुं शक्यते ॥

२६ मौक्तिकदाम—चतुर्जगणं यदि मौक्तिकदाम (∪ – ∪ ∪ – ∪ ∪ – ∪ ∪ – ∪) जगणजगणजगणजगणाः ॥

बिभेमि नितान्तमशक्तिवशाद्धि
सुखेन विचारयितुं निजवस्तु ।
तदीयमनुग्रहरूपफलं तु
निदानमहं कलये विजयेऽत्र ॥

२७ कोकरता—सयसैर्भवेत्कोकरता ययुक्तैः (∪ ∪ – ∪ – – ∪ ∪ – ∪ – –) सगणयगणसगणयगणाः ॥

कलये विभो त्वत्पदपद्मसेवां
मनसा वचोभिर्मम कायकार्यैः ।
मुदितस्तया त्वं भव मे सहाय-
स्सपदि प्रसक्ते गुरुशेषकार्ये ॥

१३ अतिजगत्याम्—

१ चञ्चरीकावली—यमौ रौ विख्यातौ चञ्चरीकावली गः। (ᴗ — — — — — — ᴗ — — ᴗ — — —) यगणमगणरगणरगणाः गुरुश्च।

एकादश गन्धर्वाः—

स गन्धर्वस्स्वानुर्भूरिशोभाननोसौ
द्वितीयो भ्राडास्ते भ्राजतेऽयं प्रसिद्ध्या।
तथानाम्नांऽगारस्सोंहसां द्विट्पतिर्य-
स्स बंभारिर्यो बंभ्रम्यमाणारिरास्ते॥

२ क्षमा—तुरगरसयतिर्नौ ततौ गः क्षमा। (ᴗ ᴗ ᴗ ᴗ ᴗ ᴗ —। — ᴗ — — — ᴗ —) नगणनगणतगणतगणाः गुरुश्च सप्तभिष्षड्भिर्यतिः॥

हसनकृतिपरो हस्तसंज्ञो भवे-
च्छुभकररुचिभिर्यस्सुहस्तो विभुः।
कृशजनसुखदोयः कृशानुस्स्वयं
निखिलवसुधरो भाति विश्वावसुः॥

३ प्रहर्षिणी—म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयं (— — — ᴗ ᴗ ᴗ ᴗ — ᴗ — ᴗ — — —) मगणनगणजगणरगणाः गुरुश्च। त्रिभिर्दशभिर्यतिः॥

मूर्धन्वान्वहति यतश्शिरः प्रधानं
सूर्यस्येव रुचिधरस्स सूर्यवर्चाः।
स्वं कृत्यं कुरुत इति श्रिया कृतिस्ते
गन्धर्वाः प्रथितरुचो हि सूर्यरूपाः॥

४ मत्तमयूरम्—वेदै रंध्रैर्म्तौ यसगा मत्तमयूरम्। (— — — —। — ᴗ ᴗ — — ᴗ ᴗ — — —) मगणतगणयगणसगणाः गुरुश्च। चतुर्भिर्नवभिर्यतिः॥

त्रयोदशविश्वेदेवाः—

विश्वेदेवास्संकथितास्ते दश पूज्याः
देवानन्ये त्रीन्दशयुक्तान्परमाहुः।

देवाः केचित्ते प्रियपौरूरवसंज्ञा-
स्तेषामन्ये ह्यार्द्रवनाम्ना विदितास्युः ॥

५ रुचिरा—चतुर्ग्रहैरिह रुचिरा जभस्जगाः। (υ – υ – । υ υυυ – υ – υ –) जगणभगणसगणजगणाः गुरुश्च। चतुर्भिर्नवभिर्यतिः ॥

ऋतुर्वसुर्ध्वनिधृतिकालदक्षकाः
परस्सकोऽपि[1] च कुरुकामसत्यकाः।
पुरूरवा दश च तथार्द्रका धुरि-
स्स रोचको तदनु विलोचनस्त्रयः ॥

६ मंजुभाषिणी—सजसा जगौ भवति मंजुभाषिणी। (υυ – υ – υυυ – υ – υ –) सगणजगणसगणजगणाः गुरुश्च ॥

धर्मविमर्शः—

नृवरोऽमरो भवितुमर्हति स्वयं
सुमना गुणैर्यदि भवेत्स्वधर्मजैः।
स विपर्ययेन यदि जीवति स्थिरं
द्रुमकीटपक्षिमृगजन्मवान्भवेत् ॥

८ सरसा—सजसा स्सगौ च कथिता सरसैषा। (υυ – υ – υυυ – υυ – –) सगणजगणसगणसगणाः गुरुश्च ॥

लभते स्वधर्मनिरतो बहु पुण्यं
भजते हि तस्य सुफलं स जगत्याम्।
विदितस्स्वधर्ममहिमा सुखदाता
तमहं करोमि विशदं निजमत्या ॥

७ सुमङ्गलिका—(कलहंसः) सजसास्सगौ यदि सुमंगलिकेयम्। (υυ – υ – υυυ – υυ – –) सगणजगणसगणसगणाः गुरुश्च ॥

---

[1] को वा भवेत्—(तस्य नाम न ज्ञायत इत्यर्थः).

अखिलानि यो धरति पाति स धर्म-
स्सुविधार्यते जगदनेन स धर्मः ।
अखिलं प्रतिष्ठत इदं खलु धर्मे
परमात्मनोऽस्ति न परस्स च धर्मः ॥

८ प्रभद्रकम्—भवति नजौ च सजगाः प्रभद्रकम् । (ᴗᴗᴗ ᴗ—ᴗᴗᴗ—ᴗ—ᴗ—) नगणजगणसगणजगणाः गुरुश्च ॥

स्वनिजमहिम्नि यदयं प्रतिष्ठितो
हृदि तदसौ सुविदितस्स्वधर्मवान् ।
स्वपदविदत्र हि भवेत्स्वधर्मगो
भज परमात्मनिजतत्त्वमात्मना ॥

१४ शक्वर्याम्—

१ असंबाधा—म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा ॥ (—— ——।ᴗᴗᴗᴗᴗᴗ———) मगणतगणनगणसगणाः द्वौ गुरू ॥ पञ्चभिर्नवभिर्यतिः ॥

कल्याणाऽऽधारान् यदि कलयसि तद्धर्मा-
स्तानाचारे त्वं समनुसर मनश्शुद्ध्यै ।
तन्मूला भक्तिर्भवति खलु तया ज्ञानं
मुक्तिं सारूप्यादिमथ भजसि तेन त्वम् ॥

२ अपराजिता—ननरसलघुगैस्स्वरैरपराजिता । (ᴗᴗᴗᴗᴗ ᴗ—।ᴗ—ᴗᴗ—ᴗ—) नगणनगणरगणसगणाः लघुः गुरुश्च । सप्तभिस्सप्तभिर्यतिः ॥

अनुकुरु परमात्मधर्मगुणान्सदा
यदि तव भवति स्वधर्मरतिः परा ।
शुभगुणवशतो मनो विमलं भवे-
त्तदनु भवति ते परात्मनि मानसम् ॥

३ वसन्ततिलका—उक्ता वसन्ततिलका तभजा जगौ गः। (— — ∪ — ∪ ∪ ∪ — ∪ ∪ — ∪ — —) तगणभगणजगणजगणाः द्वौ गुरू। (इयमेव सिंहोद्धता, उद्धर्षिणी, शोभावती च)॥

उक्ता गुणा हि करुणाभयदानरक्षा-
सत्यप्रसादसमतार्जवधीरभावाः।
पारार्थ्यभूतहितचिन्तनभूत्यहिंसा
देवस्य तान्समधिगच्छ यथोचितं त्वम्॥

४ प्रहरणतिलका—ननभनलघुगाः प्रहरणतिलका। (∪ ∪ ∪ ∪ ∪ ∪ — ∪ ∪ ∪ ∪ ∪ ∪ —) नगणनगणभगणनगणाः लघुः गुरुश्च॥

करुणा—

विपदशितजने कुरु बहुकरुणां
प्रदिश सदयनं वितर बहुधनम्।
तनु रुगपनयं वद हितवचनं
भर तदनुजनं नय तमुदयिनम्॥

५ इन्दुवदना—इन्दुवदनाभजसनैस्सगुरुयुग्मैः। (— ∪ ∪ ∪ — ∪ ∪ ∪ — ∪ ∪ ∪ — —) भगणजगणसगणनगणाः द्वौ गुरू॥

अभयदानम्—

ईतिहतभूतनिहतान्सुपरिपातुं
भूतहितभावभरितो ऽपनयभीतिम्।
गेहधनसाह्यकरणादरिविनाशात्
साधु कुरु शोककहरणादभयदानम्॥

६ अलोला—द्विसप्तच्छिद्लोला म्सौ म्भौ गौ चरणे चेत्। (— — — ∪ ∪ — — । — — — ∪ ∪ — —) मगणसगणमगणभगणाः द्वौ गुरू। सप्ताभिस्सप्तभिर्यतिः॥

रक्षा—

भूकंपादनलाद्वा व्यालश्वापद्बाधात्
शत्रोर्वारिविघातादापन्मोचनमारात् ।
कार्यं तक्षणकार्यै कृत्वा रक्षणमाद्यं
भूतानामिह धैर्याद्रक्षासद्गुणभाक् स्याः ॥

७ कुमारी—नजभजगैर्गुरुश्च वसुषट् कुमारी (⏑⏑⏑⏑—⏑—⏑। ⏑⏑—⏑——) नगणजगणभगणजगणाः द्वौ गुरू। अष्टाभिष्षड्भिर्यतिः ॥

सत्यम्—

मनसि सुचिन्तनं नु सुधिया यथार्थं
वचसि सुभाषणं नु सुहृदा यथार्थम् ।
कृतिषु सुकर्मकं नु करणैर्यथार्थं
त्रिकरणसत्यमेव भजसे यथार्थम् ॥

८ मंजुभाषिणी—सजसा जगौ गिति च मंजुभाषिणी। (⏑⏑—⏑—⏑⏑⏑—⏑—⏑——) सगणजगणसगणजगणाः द्वौ गुरू ॥

प्रसादः—

सफलं हितं भवति तत्प्रसादजातं
क्रियते प्रियं सुकृतशान्तमानसैर्यत् ।
तदलं सुमित्र भज भक्तिभावतस्तान्
सुजनान्परेशमिव सन्ततं प्रसन्नः ॥

९ सुकेसरम्—नरनरैर्लगौ च ललितं सुकेसरम् । (⏑⏑⏑—⏑—⏑⏑⏑—⏑—⏑—) नगणरगणनगणरगणाः लघुः गुरुश्च ॥

समता—

द्विजनृपार्यशूद्रसकलान्त्यजेषु वा
मृगगजाऽश्वगोश्वखगकीटकेषु वा

समुद्यास्तदुःखसुखभूमिषु स्थिरो
हृदि समाश्रय स्वसमतां सुकृती त्वम् ॥

१० मदनार्ता—अन्त्ये गुरुयुग्मं त्यसभाश्चेन्मदनार्ता । (— — ⏑ ⏑ — — ⏑ ⏑ — — ⏑ ⏑ — —) तगणयगणसगणभगणाः द्वौ गुरू ॥

१ आर्जवम्—

वक्रो हृदि भावो यदि न स्याच्छ्रयते त्वां
भूमार्जवभावश्शुचिभूमाविवरागः ।
मर्त्योऽखिलकार्येष्वृजुधर्माभिरतश्चे-
त्तस्य प्रियवश्या जनताऽऽस्ते गुणरक्ता ॥

२ चतुर्दशमनवः—

स्वायम्भुवनामा प्रथमोऽसौ मनुरुक्त-
स्स्वारोचिषनामौत्तमिकस्तापसनामा ।
तद्रैवतदेवो ह्यपरश्चाक्षुषदेवो
वैवस्वतनामा रविवंशादिमनुस्स्यात् ॥

३ सावर्णिरथायं परतष्षट्पदवर्ती
दक्षो मनुरेषां प्रथमो ब्रह्मसुनामा ।
धर्मोमनुरुद्रौ हितरौच्यश्चषडिन्द्रः
ख्याता मनवो ये सचतुर्भिर्दशभिस्ते ॥

११ पथ्या—सजसा यलौ च सहगेन पथ्या मता । (⏑ ⏑ — ⏑ — ⏑ ⏑ ⏑ — ⏑ — — ⏑ —) सगणजगणसगणयगणाः लघुः गुरुश्च ॥

धीरभावः—

धनबान्धवादिविलयेऽत्र चित्ते भवं
व्यसनं निपात्य धृतधैर्यभावो यदा ।

घनमार्गतोऽधिकृतकार्यभारस्तदा
निजधीरभावगुणदीप्तिमांस्त्वं भवेः ॥

१२ प्रमदा—नजभजला गुरुश्च भवति प्रमदा । (∪∪∪∪ – ∪ – ∪∪∪ – ∪∪ –) नगणजगणभगणजगणाः लघुः गुरुश्च ॥

पारार्थ्यम्—

तव जननं परार्थमिति भोः करुणा-
रसपरिपूरणेन हृदयेन कृती ।
परहितमेव नित्यमनुगच्छसि चे-
त्त्वमथ परार्थतासुगुणमाद्रियसे ॥

१३ मध्यक्षामा—मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ । (– – – – । ∪∪∪∪∪∪ – – – –) मगणभगणनगणयगणाः द्वौ गुरू । चतुर्भिर्दशभिर्यतिः ॥

भूतहितचिन्तनम्—

भूतग्रामं कथमपि सुखिनं कारुण्या-
दुर्व्यां कुर्यामिति मतिसुभगस्सर्वात्मा ।
स्वार्थत्यागात्कुरु हितमचलस्सर्वेषां
भूतप्रीतिं भज भज सुगुणं धर्मात्मा ॥

१४ वासन्ती—मात्तो नो मो गौ यदिगदिता वासन्तीयम् । (– – – – – ∪∪∪∪ – – – – – –) मगणतगणनगणमगणाः द्वौ गुरू ॥

भूतिः—

ऐश्वर्यं भूतिः परमहिता स्वातन्त्र्यात्मा
व्याहारे भावे कृतिकरणे सौख्यावाप्तौ ।
आगारे देशे समरविधौ सैन्ये कोशे
तद्भूत्यायुक्तो जयसि यथा लोकेशस्त्वम् ॥

१५ अतिशक्कर्याम्—

१ लीलाखेला—एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेला। (— — — — — — — — — — — — — — —) मगणमगणमगणमगण मगणाः ॥

अहिंसा—

केनाप्यन्ये नीता बाधा हिंसा प्रोक्ता लोकेऽस्मिन्
नो चेन्नीता बाधा येनाऽहिंसावृत्तिस्साऽप्युक्ता।
तद्धर्मस्थे हिंसावृत्तिर्नोदेत्यन्योऽन्याभावा-
त्तद्धर्मात्मा शुद्धो योऽसौ बुद्धस्तादृग्भूयास्त्वम् ॥

२ तूणकम्—तूणकं समानिकापदद्वयं विनाऽन्तिकम्। (— ∪ — ∪ — ∪ — ∪ — ∪ — ∪ — ∪ —) रगणजगणरगणजगणरगणाः ॥

सांसारिकपरस्परधर्माः—

तत्स्वधर्मतत्त्वमुक्तमत्रसत्वरूपकं
तद्गुणाश्च ते ह्यनन्तधा स्थितास्तथापि ये।
मुख्यतां भजन्ति तेऽपि दर्शिता मतिं गता
नित्यकार्यमार्यधर्मतत्वमद्य कथ्यते ॥

३ शशिकला—द्विहतहयलघुरथगिति शशिकला। (∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ —) नगणनगणनगणनगणसगणाः ॥

पितृधर्मः—

सदशनवसनरुगपनयकरणं
नयविनयमुखगुणभृदधिकरणम्।
श्रुतिततिकलितहितसुमतिकरणं
स्वतनयविषयकपितृजनकरणम् ॥

४ स्रक्— स्रगिति भवति रसनवकयतिरियम्। (∪ ∪ ∪ ∪ ∪ ∪। ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ —) नगणनगणनगणनगणसगणाः। षड्भिर्नवभिर्यतिः ॥

पुत्रधर्मः—

स्वपितृविहितमतिहितकृतिकरणं
सरुजि पितरि सुविधिरुगपहरणम् ।
विनयसदयकृतपदपरिचरणं
पितृविषयकसुतजननिजकरणम् ॥

५ मणिगुणनिकरः—वसुहययतिरिह मणिगुणनिकरः । (∪∪ ∪∪∪∪∪∪। ∪∪∪∪∪∪–) नगणनगणनगणनगणसगणाः । अष्टाभिस्सप्तभिर्यतिः ॥

सतीधर्मः—

पतिपदरतियुतबहुपरिचरणं
तदभिमतसरणिसमुदनुसरणम् ।
प्रियकरसुमधुरसुखरसभरणं
परिणयपतिकरगतिजनकरणम् ॥

६ मालिनी—ननमयययुतेयं मालिनी भोगिलोकैः । (∪∪∪ ∪∪∪––। –∪––∪––) नगणनगणमगणयगणयगणाः । अष्टभिस्सप्तभिर्यतिः ॥

पतिधर्मः—

गुणगणसमवेतां मानिनीं स्वस्य भार्यां
गृहगतजनसेवाधर्मसक्तां स्ववश्यां ।
प्रणयवचनवित्तैः पालयेत्पूर्णभावैः
पतिजनकरणीयो धर्म एष प्रशस्तः ॥

शुक्लपक्षप्रतिपदादिपञ्चदशाहानां श्रौतनामानि—

प्रतिपदि सितपक्षे नाम संज्ञानमाद्यं
सवितृहितकरे विज्ञानमह्नि द्वितीये ।

नयति मुदमुमां प्रज्ञानमस्मिन्स्तृतीये
गणपतिहितदे तज्ज्ञानदार्ढ्यं चतुर्थे ॥
गरुडमुदभिजानत्पञ्चमाहेऽथ षष्ठे
गुहपरमहिते यत्तच्च सङ्कल्पमानम् ।
रविरथदिवसाहे कल्पमानं प्रपूर्व-
मुपपदसहितं दुर्गाष्टमे कल्पमानम् ॥
सनवममुपक्लृप्तं रामजन्मातिपूते
सविजयदशमाहे क्लृप्तमर्घ्यं सुराणाम् ।
हरिहरहितभूते श्रेय एकादशाऽहे
हरिभजनसुदीप्ते यो वशी द्वादशाहे ॥
त्र्यधिककृतदशाहे तच्छनेऽर्घ्यं यदायत्
चतुरितदशके संभूतमानन्तकेऽह्नि ।
विधुकरपरिपूर्णे पूर्णिमाहे हि भूतं
शरकलितदशाहेष्वेवमाहुस्समाख्याः ॥

७ चन्द्रलेखा—म्रौ म्यौ याद्यौ भवेतां सप्ताष्टभिश्चन्द्रलेखा।
(— — — — ⏑ — — । — — ⏑ — — ⏑ — — —) मगणरगणमगणयगण-
यगणाः । सप्तभिरष्टाभिर्यतिः ॥

राजधर्मः—

राजाराष्ट्रं समन्तात्स्निग्धान्तरङ्गः प्रजाना
माहारार्थं यथावद्वृत्तिप्रवृत्तिव्यवस्थाम् ।
विद्याऽऽरोग्यार्थयोग्यां सन्मार्गरीतिं प्रकल्प्य
प्रायो देशे विदेशे कीर्त्या स्वधर्माद्विराजेत् ॥

१६ अष्ट्याम्—

१ वृषभगातिविलासितम्—भ्नौ त्रिनगास्स्वराः खमृषभगति-

विलसितम् (– ᴗᴗ – ᴗ – ᴗ। ᴗᴗᴗᴗᴗᴗᴗᴗ –) भगणरगणनगण-नगणनगणाः गुरुश्च । सप्तभिर्नवभिर्यतिः ॥

प्रजाधर्मः—

राजनि तत्प्रजाश्च कृतसद्मलमनसो
राज्यसुधारणाय बहुविधनयशरणाः ।
शत्रुविपच्छमार्थमतुलधनवितरणाः
पान्ति हितं स्वधर्ममतिशयचतुरतया ॥

२ अश्वगतिः पञ्चभकारकृताऽश्वगतिर्यदिचान्तगुरुः (– ᴗᴗ – ᴗᴗ – ᴗᴗ – ᴗᴗ – ᴗᴗ –) भगणभगणभगणभगणभगणाः गुरुश्च॥

गुरुधर्मः—

शिष्यजनादरतत्परिपालनशक्तगुरु-
र्ज्ञानविबोधकशास्त्रविचारकभावगतिम् ।
सन्ततशिष्यमहोदयदायकमार्गततिं
द्रागुपदिश्य ततो निजधर्ममयं भजते ॥

३ पञ्चचामरः—लघुर्गुरुर्निरन्तरं यदा स पञ्चचामरः (ᴗ – ᴗ – ᴗ – ᴗ – ᴗ – ᴗ – ᴗ – ᴗ –) जगणरगणजगणरगणजगणाः गुरुश्च ॥

शिष्यधर्मः—

निजं गुरुं सभक्तितस्स्वदैवतं विभावयन्
तदार्यपादसेवया तदाज्ञया तदाश्रयात् ।
तदात्तबोधबुद्धिमान्तदाशिषाप्तसिद्धिमान्
स्वशिष्यधर्ममादरात्सुशिक्षितो हि सेवते ॥

४ गुणभूषा—लघुयुग्मादधिकाद्या मदनार्ता गुणभूषा । अथवा प्रमाणिकागतप्रत्यक्षरद्विरुक्तया षोडशाक्षरात्मकपादोपेता। अथवा द्विपञ्चाशत्तमवितानविशेषवृत्तस्य पादौ यस्याः पादः सा। (चतुर्थाष्टमद्वादशषोडशाक्षरेषु यतियुक्ताऽपि गुणभूषा)

अथवा सभतैर्युग्यसगैर्युग्यतितुर्या गुणभूषा। (ᴗᴗ−−ᴗᴗ−−ᴗᴗ−−ᴗᴗ−−) सगणभगणतगणयगणसगणाः गुरुश्च। विवरणम्। अष्ट्याख्यछन्दोजातेषु षट्त्रिंशदधिकपञ्चशतोत्तरपञ्चषष्टिसहस्रसंख्याकवृत्तेषु, अष्टोत्तरशताधिकत्रयोदशसहस्रतमं लघुद्वयगुरुद्वयक्रमेण षोडशाक्षरपादात्मकं वृत्तं गुणभूषाऽभिधानेनात्र व्यवह्रियते। (एतद्ग्रन्थकर्त्रा रचिता 'स्तुतिकुसुमाञ्जलिस्था गिरिजास्तुतिः' अस्मिन्नेववृत्ते निबद्धा भवति ॥

गृहस्थसामान्यधर्मः—

गृहमेधी गृहिणीयुक्प्रियपुत्रैर्धनधान्यै
श्श्रितबन्धुः पुरुषार्थान्कुलधर्मान्हितकाले।
परिपाल्य प्रणयेन स्थिरभक्तिं गुरुवर्गे
सुचिरायुस्सुखभोगाननुभूयादिहयोग्यान् ॥

चन्द्रस्य षोडशकलाः—

२ अमृता मानदयाऽऽप्ता ह्यथ पूषा सह तुष्ट्या
सुखपुष्टिस्सह रत्या सह धृत्या मुनिसंख्याः।
शशिनी चन्द्रिकयाप्ता सह कान्त्या दशसंख्या-
स्सह सा ज्योत्स्निकया श्रीः कलिता द्वादशसंख्याः॥
अथ सा प्रीतिकला चाङ्गदया सा सह पूर्णाऽ
मृतयाऽऽप्ता सकलाष्षोडशसंख्या हि कलास्ताः।
सितपक्षे क्रमवृद्धा बहुळे ह्रासमुपेता
रविधाम्नामुदयास्तैर्विधुभूमिभ्रमणाद्यैः ॥

षोडशमातृकाः—

४ वरगौरीमथ पद्मां सशचीं तां भज मेधां
अथ सावित्र्यभिधानां विजयां तां च जयां ताम्।
कृतदेवाद्यपदाऽऽप्तामिह सेनां स्वधयाऽऽप्तां
सुयुगाहां द्विपदाढ्यां श्रुणु ता मातर इत्थम् ॥

८ अथ ता लोकपदाद्या विदिता मातर एवं
श्रुणु शान्तिं सह पुष्ट्या सह धृत्या सह तुष्ट्या ।
सकलाष्षोडशनाम्न्यः कुलदैवात्मकदेव्यो
बहुभाग्यं सुखमायुः कुशलं ते ददतेऽलम् ॥

५ वाणिनी—नजभजरैर्यदा भवति वाणिनी गयुक्तैः। (∪∪∪∪—∪—∪∪∪—∪—∪———) नगणजगणभगणजगणरगणाः गुरुश्च॥

तत्त्वविद्धर्मः—

भवति यदा मनस्सुकृतधर्मतो विशुद्धं
तदनुगतायनेष्वधिगतोऽखिलार्थभारम् ।
स्वपरहितोदयाय विनियुज्य तं स्वकामान्
सुखमनुभूय भो निजसुखं भजाऽऽत्मवित्त्वम् ॥

१७ अत्यष्ट्याम्—

१ शिखरिणी—रसैरुद्रैश्छिन्ना यमनसभलागश्शिखरिणी । (∪—————|∪∪∪∪∪——∪∪∪—) यगणमगणनगणसगणभगणाः लघुः गुरुश्च । षड्भिरेकादशभिर्यतिः ॥

असंख्याकैर्यत्नैरपि पुरुषकारो हि विफलो
न दैवं पर्याप्तं स्वयमखिलकाम्यार्थविजये ।
स्वयत्नैर्धीरस्त्वं कुरु निजकृतिं भोः प्रतिदिनं
स्वसिद्धेर्देवांस्त्वं तनु सुमुखिनस्स्वर्पितभरः ॥

२ पृथ्वी—जसौ जसयलाग्वसुग्रहयतिश्च पृथ्वी गुरुः (∪—∪∪∪—∪—|∪∪∪—∪——∪—) जगणसगणजगणसगणयगणाः लघुःगुरुश्च । अष्टभिर्नवभिर्यतिः ॥

मनोरथपरायणो भज तवेष्टदेवं परं
तदन्यमतिधारणं त्यज तदा धिया तत्परः ।
स एव सुशको भवेद्धटयितुं यथेष्टान् हितान्
त्वमत्र परमात्मदृग्यदि तदा स सर्वेश्वरः ॥

३ वंशपत्रपतितम्—दिङ्मुनिवंशपत्रपतितं भरनभनलगैः। (–∪∪–∪–∪∪∪–।∪∪∪∪∪∪–) भगणरगणनगणभगणनगणाः लघुः गुरुश्च। दशभिस्सप्तभिर्यतिः॥

लोकविभुर्विभूतिवशतो भवति हि शतधा
स्वीकृतरूपनामभरितो भजनकरमुदे।
माधवरामकृष्ण इति तं बहुविधवरदं
शङ्करसांबरुद्र इति तं विदुरिह सुखदम्॥

४ मन्दाक्रान्ता—मन्दाक्रान्ताजलधिषडगैम्भौ नतौ तो गुरू-चेत्। (––––।∪∪∪∪∪–।–∪––∪––) मगणभगणनगणतगणतगणाः द्वौ गुरू। चतुर्भिष्षड्भिस्सप्तभिर्यतिः॥

माधवः—

वन्दे देवं परमपुरुषं श्रीपतिं माधवं त्वां
भक्तश्रेयोऽधिगमवरदं मोक्षदं श्रेष्ठरूपम्।
कल्याणानां परमसुनिधिं पावकं पापराशेः
कारुण्याऽऽप्तं सुरनरहितं चिन्मयं स्वात्मभूतम्॥

५ हरिवृत्तम् (हरिणी)—रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा कथिता हरिः। (∪∪∪∪∪–।––––।∪–∪∪–∪–) नगणसगणमगणरगणसगणाः लघुः गुरुश्च। षड्भिश्चतुर्भिस्सप्तभिर्यतिः॥

रामः—

दशरथहितं रामाकारं जगत्त्रयपालकं
गुरुयजनपं सीताकान्तं वनाश्रयरक्षकं।
कपिपतिसखं वन्दे भक्त्या विभीषणरक्षकं
दशमुखहरं रामाहं त्वां धराऽमरपालकम्॥

६ नर्त्कुटकम् (नर्दटकम्)—हयदशभिर्नजौ भजजला गिति नर्त्कुटकम् । (◡◡◡◡–◡–।◡◡◡–◡◡–◡◡–) नगणजगण-भगणजगणजगणाः लघुः गुरुश्च । सप्तभिर्दशभिर्यतिः ॥

कृष्णः—

अरिजनभञ्जने कृतधियं यदुवंशपतिं
मुनिजनरञ्जने हितहृदं निजभक्तनिधिम् ।
कुरुकुलकर्षणे स्तुतजयं विजयाद्यगतिं
मम हृदि भावये सुरनुतं विभुकृष्णमहम् ॥

७ कोकिलकम्—मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम् । (◡◡◡◡–◡–।◡◡◡–◡◡।–◡◡–) नगणजगणभगणजगण-जगणाः लघुः गुरुश्च । सप्तभिष्षड्भिश्चतुर्भिर्यतिः ॥

शङ्करः—

भयहरशङ्करे स्थिरप्रियङ्करमुक्तिकरे
शरणमहं भजेऽसुरनरामरशक्तिधरे ।
हितवरदानतो नरसुरासुरशक्तिकरे
तव चरणाम्बुजे समवलंबनमारचये ॥

८ चित्रलेखा—ससजा भजगा गुदिक्स्वरैर्भवति चित्रलेखा । (◡◡–◡◡–◡–◡–।◡◡◡–◡––) सगणसगणजगणभगण-जगणाः द्वौ गुरू । दशभिस्सप्तभिर्यतिः ॥

साम्बशिवः—

यदि साम्बशिवं भजाम्यहं सदुमया सहत्वां
किमु देवगणैर्ममेतरैस्तव सदाश्रिता ये ।
भवपाशहरं भवं हरं सकलजीवपालं
सुखशान्तिकरं प्रियात्मकं निखिलभावबोधम् ॥

सप्तदशतत्वात्मकसूक्ष्मशरीरम्.

१ सह धीन्द्रियपञ्चकैः कृतं विषयगप्रतीतौ
करणेन्द्रियपञ्चकैस्समं कृतिपरायणैर्यत् ।
असुदानिलपंचकैर्युतं मतिमनोयुतं त-
न्निजसूक्ष्मशरीरमुच्यते तदनुगोऽयमात्मा ॥

१ धृत्याम्—

१ हरिचङ्क्रमा—रात्सजौ जभरा विदुर्वसुदिग्यतिर्हरिचङ्क्रमा । (—υ—υυ—υ—।υυ—υ—υυ—υ—) रगणसगणजगणजगणभगणरगणाः । अष्टभिर्दशभिर्यतिः ॥

१ शङ्करे त्वयि मानसं यदि सन्ततं सुविधीयते
शङ्करं न शिवङ्करं वद किं भवेदिति गीयते ।
किङ्करैस्तव यत्सुखं शिव सन्निधावनुभूयते
किङ्करे मयि तत्सुखं सुखमास्त्विति प्रविभाव्यते ॥

२ हरिणप्लुतम्—म्सौ जो जो भरसंयुता करिबाणकैर्हरिणप्लुतम् । (———υυ—υ—।υυ—υ—।υυ—υ—) मगणसगणजगणजगणभगणरगणाः । अष्टभिः पञ्चभिः पञ्चभिर्यतिः ॥

२ कैलासोऽमरसेवितस्तव मन्दिरं बहुसुन्दरं
लोकाम्बा गिरिजा सती तव सुन्दरी हितशंकरी ।
हेरम्बो गणनायकस्तवपुत्रकस्सुरनायकः
संसारः परमाद्भुतः कथमागतो वद देव ते ॥

अष्टादशपुराणानि—

३ ब्राह्मं भागवताग्निके सुवराहकं वरवामनं
मार्कण्डेयकनारदे वरलिङ्गकं परपाद्मकम् ।
स्कान्दं ब्रह्मविवर्तकं परमात्स्यकं वरकूर्मकं
ब्रह्माण्डं च भविष्यदित्यथ गारुडं शिववैष्णवे ॥

३ निशा । (सुधा—नाराचम्) नगणयुगलरोऽब्धिरेषा यदा

स्युर्निशा सा भवेत्। (⏑⏑⏑⏑⏑⏑–⏑––⏑––⏑––⏑–)
नगणनगणरगणरगणरगणरगणाः। दशभिरष्टभिर्यतिः॥

भवति यदि भवे रुचिस्ते विलासात्सुखार्थं विभो
भव वद सुमते न युक्ता कुतो मानवानां तथा।
प्रकृतिगुणवशाद्भवश्चेन्न शस्तस्सदा दुःखदो
गुणपरिहरणे विधिः को भवेत्त्वं मम ब्रूहि भोः॥

४ करिणी—सनजा अपि नभसा शरयतिभिर्यदि करिणी। (⏑⏑–⏑⏑।⏑⏑–⏑⏑।⏑⏑–⏑⏑।⏑⏑–) सगणनगणजगण-नगणभगणसगणाः। पञ्चभिः पञ्चभिः पञ्चभिस्त्रिभिर्यतिः॥

गिरिजा—

गिरिजे दिश घृणया मम भवसागरतरणं
भवतोऽधिककरुणा यदि मयि तेऽनघहृदये।
जलजन्तुभिरभितो भयकृशविह्वलतनये
तरणिं तव चरणं मम शरणं कुरु जननी॥

५ कुसुमितलतावेल्लिता—स्याद्भूतर्त्वश्वैः कुसुमितलता वेल्लिता म्तौ नयौ यौ। (–––––।⏑⏑⏑⏑⏑–।–⏑––⏑––) मगणतगणनगणयगणयगणयगणाः। पञ्चभिष्षड्भिस्सप्तभिर्यतिः॥

कुमारः—

व्यर्था मे याच्ञा बत पितरि ते [1]मातरि त्वद्विभूतौ
त्वत्साम्यं यस्मान्न मम गुणतो भूरिसामर्थ्यतो वा।
तत्त्वामेवाहं शरणमुपगतस्तत्प्रियस्त्वं कुमारो
नान्यो मत्कल्पस्सुगुणरहितो लाघवाच्यक्तसङ्गः॥

६ हरनर्तकम्—नौ जयौ भरसहितौ करिबाणाक्षैर्हरनर्तकम्। (–⏑–⏑⏑⏑⏑–।⏑⏑–––।⏑⏑–⏑–) रगणनगण-जगणयगणभगणरगणाः। अष्टभिः पञ्चभिः पञ्चभिर्यतिः॥

---

[1] त्वद्विभूतौ—त्वमेव विभूतिः (परमैश्वर्यं) यस्य सः तस्मिन् अथवा यस्या-स्या तस्याम्। इदं 'पितरि मातरि' पदयोः प्रत्येकं विशेषणम्.

कार्तिकेय सुरगणे वरसैन्यपः प्रथितो बली
सप्तमातर इति ते प्रियनामतो दिश कोऽधिकः ।
तारकासुरहनने खलु दर्शितं भुजशौर्यकं
कीदृशा वयमभयं त्वयि याचितुं किमु शक्नुमः ॥

७ चित्रलेखा—मन्दाक्रान्तानलघुपरयुता कीर्तिता चित्रलेखा (— — — —।◡ ◡ ◡ ◡ ◡ ◡ —।— ◡ — — ◡ — —) मगणभगणनगणयगण यगणयगणाः । चतुर्भिस्सप्तभिस्सप्तभिर्यतिः ॥

त्वं चेत्पित्रोरयनमनुसृतो दीनकारुण्यशून्यो
गच्छेयं भोऽशरणमनुपदि प्रेमधामानमन्यम् ।
सन्त्येवाऽन्ये सरससुहृदया रक्षणे मेऽत्र दक्षाः
प्राप्तोऽहं त्वां तुलयितुमनसा द्राक्परीक्षार्थमन्यैः ॥

८ नन्दनम्—नजभजरैस्तुरेफसहितैश्शिवैर्हयैर्नन्दनम् । (◡ ◡ ◡ ◡ — ◡ — ◡ ◡ ◡ —।◡ — ◡ — — ◡ —) नगणजगणभगणजगणरगण रगणाः । एकादशाभिस्सप्तभिर्यतिः ॥

प्रथितषडाननानि किमु ते पयस्सुपानाय वा
चतसृषु दिक्षु संसृतिगतान्सुभर्तुकामाय वा ।
द्व्यधिकदशेक्षणानि प्रकृतेस्समीक्षितुं वा श्रियं
व्यसनशतैर्हतानिह नरान्दयादृशा रक्षितुम् ॥

९. शार्दूलललितम्—मस्सोजस्सतसा दिनेशऋतुभिश्शार्दूल-ललितम् । (— — — ◡ ◡ — ◡ — ◡ ◡ ◡ —।— — ◡ ◡ ◡ —) मगणसगण जगणसगणतगणसगणाः द्वादशभिष्षड्भिर्यतिः ॥

हेरम्बः—

हेरम्ब त्वमपीह मोदकपरो नालक्षयसि मां
संरम्भादथवा तनोषि कुशलं भक्तस्य तव मे ।

आयातां बहुविघ्नसन्ततिमहं तीर्त्वाऽऽशु सुसुखी
सेवे त्वामधिकप्रियात्प्रमुदितस्तेऽनुग्रहवशात् ॥

१९ अतिधृत्याम्—

१ मेघविष्फूर्जितम्—रसर्त्वश्वैर्यमौ न्सौ ररगुरुयुता मेघविष्फूर्जितं स्यात्। (ᴗ – – – – – – । ᴗ ᴗ ᴗ ᴗ ᴗ – । – ᴗ – – ᴗ – –) यगणमगणनगणसगणरगणरगणाः गुरुश्च। षड्भिष्षड्भिस्सप्तभिर्यतिः ॥

हृषीकेशं ध्यायाम्यहमभयदं लोकरक्षासुदीक्षं
हृषीकानां सम्यङ्नियमकरणे कारणं त्वामभेद्यम्।
सदा देवैरीड्यं शुभकरमतिं सान्द्रकारुण्यसिंधुं
विभो भक्तं ते मां विनयसहितं पाहि पद्माक्ष नित्यम् ॥

२ शार्दूलविक्रीडितम्—सूर्याश्वैर्मसजास्ततास्सगुरवश्शार्दूलविक्रीडितम्। (– – – ᴗ ᴗ – ᴗ – ᴗ ᴗ ᴗ – । – – ᴗ – – ᴗ –) मगणसगणजगणसगणतगणतगणाः गुरुश्च। द्वादशभिस्सप्तभिर्यतिः ॥

मातस्ते तनयं तिरस्कृतसुखं मां पाहि पद्मालये
गोविन्देन न मे भवेत्सुफलिता या काचिदाशास्थिरा।
यत्तस्याश्रयिणो भवन्ति बहवो नाहं भवेयं प्रियो
मातुः प्रीतिरिह स्थिरेति मनुजैस्सामान्यतो गृह्यते ॥

३ मणिदीप्तिः—मस्सौ तो जयगा मणिदीप्तिर्दिङ्निधिभिर्यदिविच्छिन्ना। (– – – ᴗ ᴗ – ᴗ ᴗ – – । – ᴗ ᴗ – ᴗ ᴗ – – –) मगणसगणसगणतगणजगणयगणाः गुरुश्च। दशभिर्नवभिर्यतिः ॥

लक्ष्मीस्त्वं धनदा सुमतीनां स्या विपुलं न धनेप्सा मे
वाणि त्वं मतिदा सुकवीनां स्या विमलं न मतीच्छा मे।

गौरि त्वं शुभदा सुकृतीनां स्या बहुलं न शुभाशा मे
मातस्त्वं त्रिविधा त्रिगुणस्था तारय मां गुणशोकाब्धेः ॥

४ वाणी—म्भौ स्नौ यस्सा गुरुसहिता निधिविरतिश्चेदिह-
वाणी । (— — — — ⏑ ⏑ ⏑ ⏑ — । ⏑ ⏑ ⏑ ⏑ — — ⏑ ⏑ — —) मगणभगण-
सगणनगणयगणसगणाः गुरुश्च । नवभिर्दशभिर्यतिः ॥

पुत्रो मारः पतिरहिशो जननि गृहं सागरमध्ये
मत्तो वाहस्त्वमपि चला न मम गतिस्तेषु निराशा ।
किं तु प्राहुस्त्वयि विमला निजकरुणा पालनदक्षा
तामाश्रित्य प्रकृतिगतां समपनये तामसवृत्तिम् ॥

६ सुमधुरा—म्रौ भ्नौ मो नो गुरुश्चद्वयऋतुरसैरुक्ता सुमधुरा ।
(— — — — ⏑ — — । ⏑ ⏑ ⏑ ⏑ ⏑ — । — — ⏑ ⏑ ⏑ —) मगणरगणभगण-
नगणमगणनगणाः गुरुश्च । सप्तभिष्षड्भिष्षड्भिर्यतिः ॥

ब्रह्माणं त्वां भजेऽहं सकलजनताहृत्तापशशिनं
ब्रह्माण्डान्तर्वसन्तं बहिरपि तथा सर्वान्तरगतम् ।
सृष्टिव्यापारकार्ये स्थिरकृतधियं चित्राद्भुतकृतिं
वेदानां बोधगम्यं स्तुतमतिबलं तेजोऽन्तरबलम् ॥

६ सुरसा—म्रौ भ्नौ यो नो गुरुश्चेत्स्वरमुनिकरणैराहसु-
रसाम् । (— — — — ⏑ — — । ⏑ ⏑ ⏑ ⏑ ⏑ ⏑ — । — ⏑ ⏑ ⏑ —) मगणरगण-
भगणनगणयगणनगणाः गुरुश्च । सप्तभिस्सप्तभिः पञ्चभिर्यतिः ॥

लोकेश त्वां भजे त्वं मम सुखमभयं दातुमनसा
युक्तश्चेत्तन्मनो मे तव भजनपरं पादकलितं ।
कुर्वेऽहं तेऽत्र मे भो समयमधुना लेख्यकलितं
मद्धस्ताङ्केन युक्तं त्वमपि कुरु तथा मानसलिपिम् ॥

२० कृत्याम्—

१ वृत्तम्—त्रीरजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ।

(— ᴗ — ᴗ — ᴗ — ᴗ — ᴗ — ᴗ — ᴗ — ᴗ — ᴗ — ᴗ) रगणजगणरगणजगणरगणजगणाः गुरुः लघुश्च ॥

वाणि मे नमोऽस्तु ते तवाशिषोऽत्र सन्तु मे सदाऽऽदरेण
पालितोऽहमस्मि ते कृपाभरादतः प्रियो यतस्सुतोऽस्मि ।
पादपाणिकर्मणा प्रदक्षिणं तवार्चनं सुविग्रहस्य
भक्तियुग्जनास्सुखं वितन्वतेऽबलस्त्वहं धिया करोमि ॥

२ सुवदना । ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गस्सुवदना । (— — — — ᴗ — — | ᴗ ᴗ ᴗ ᴗ ᴗ ᴗ — | — — ᴗ ᴗ ᴗ —) मगणरगणभगणनगणयगणभगणाः लघुः गुरुश्च । सप्तभिस्सप्तभिष्षड्भिर्यतिः ॥

विष्णोर्वाहो गरुत्मान् वृषभपतिरुमाकान्तस्य सविधे
धातुर्हंसो भवान्या मृगपतिरधुना तान्यामि शरणम् ।
श्रान्तं मां ते नयेयुस्तदधिपतिपदं सौहार्दमनस-
स्सान्निध्याप्ताः प्रभुभ्यो हितसमाधिगमे दक्षाः परिजनाः ॥

३ गीतिका । सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका । (ᴗ ᴗ — ᴗ — | ᴗ ᴗ — ᴗ — ᴗ ᴗ | — ᴗ — ᴗ ᴗ — ᴗ —) सगणजगणजगणभगणरगणसगणाः लघुः गुरुश्च । पञ्चभिस्सप्तभिरष्टभिर्यतिः ॥

हनुमान्नतो रघुनायके मम पालने खलु शक्तिमान्
यदवाग्भवं रससागरं बहुरंहसा हि पुराऽतरत् ।
तदयं मुदा भवसागरं भुवि तारयेत्सुसुखेन मां
सुपरीक्षिऽतो विहितोद्यमे स हि शक्नुयात्सदृशोद्यमे ॥

२१ प्रकृत्याम्—

१ स्रग्धरा—म्रभ्नैर्यानां त्रयाणां त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् । (— — — — ᴗ — — | ᴗ ᴗ ᴗ ᴗ ᴗ ᴗ — | — ᴗ — — ᴗ — —)

मगणरगणभगणनगणयगणयगणयगणाः । सप्तभिस्सप्तभिस्स-
प्तभिर्यतिः ॥

देवा यूयं समेताः पदगतमनुजं रक्षितुं मां समर्थाः
प्रत्येकं वो न शक्तिर्यदि भवति सदा स्वार्थचिन्तापराणाम् ।
स्वार्थत्यागः परार्थं समुचितकरणे स्वार्थता तद्विचारे
स्वात्मार्थस्स्याद्विचारः परपदभजनात्स्वात्मभावः परार्थः ॥

२ पञ्चकावळी—(सरसी-धृतश्रीः) नजभजजा जरौ नरपते
कथिता भुवि पञ्चकावळी । (⏑⏑⏑⏑–⏑–।⏑⏑⏑–⏑⏑–।⏑⏑
–⏑–⏑–) नगणजगणभगणजगणजगणजगणरगणाः । सप्तभि-
स्सप्तभिस्सप्तभिर्यतिः ॥

तव शपथं न किं स्मरसि तं भगवन्यदनन्यभक्तिभा-
ग्जनकुशलं वहाम्यहमिहेति निजं सकलप्रियं प्रभो ।
त्वदपरवस्तु किं वद यदस्ति यथाऽस्ति च तत्वमेव मे
तदनु विचारये श्रुतिकथां बहुधा प्रथितां प्रपञ्चिताम् ॥

२२ आकृत्याम्—

१ भद्रकम् (सुभद्रकम्)—सूत्रम् । भ्रौ न्रौ न्रौ न्गौ दिगा-
दित्याः । भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं सुभद्रकमिदम् ।
(–⏑⏑–⏑–⏑⏑⏑–।⏑–⏑⏑⏑–⏑–⏑⏑⏑–) भगणरगणनग-
णरगणनगणरगणनगणाः गुरुश्च । दशभिर्द्वादशभिर्यतिः ॥

पालय मामगेन्द्रतनुजे सुरेन्द्रपददे नरेन्द्रवरदे
पादयुगे ममास्तु शरणं तवास्तु करुणा मयि स्तुतगुणा ।
भावय मामनन्यशरणं त्वदन्यवरणं न मन्य इति हा
साधय मेऽभिलाषमपरं विलासविधुरं प्रकाशमधुरम् ॥

२ हंसी—मो मो तो नो नो नो सो गो वसुभुवनयतिरिति
भवति हंसी । (––––––––।⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑––)

5281

मगणमगणतगणनगणनगणनगणसगणाः गुरुश्च । अष्टभिश्चतुर्दशभिर्यतिः ॥

लक्ष्मीदेवि त्वां वन्देऽहं सकलभुवनमनुजनमितपादां
    लक्ष्मीकान्तस्त्वद्वाग्वश्यो वद तमसकृदुपगतमव मां त्वम् ।
लक्ष्मीवासेनाऽलं तेन त्वमयि कनकमुखधनमिह दातुं
    लक्ष्मीवन्तं कर्तुं दीनं प्रभवसि कुरु मद्वनमिति याचे ॥

३ मत्तेभम्—तो भो यजौ सरनगाः पङ्क्तिसूर्ययति मत्तेभमत्र कथितम् । (– – ∪ – ∪ ∪ ∪ – – ∪ | – ∪ ∪ ∪ – – ∪ – ∪ ∪ ∪ –) तगणभगणयगणजगणसगणरगणनगणाः गुरुश्च । दशभिर्द्वादशभिर्यतिः ॥

१ प्रह्लादपालनरसिंहाय भक्तपरिपोषाय ते भगवते
    दैत्यान्विनाशयितुकामाय पापपरिहाराय तापशमिने ।
देवादिदेवसुरपूज्याय भूतभरणायाऽखिलाश्रयवते
    सर्वेश्वराय परिपूर्णाय देव वनमालिन्नमोऽस्तु शतशः ॥

तदेव—सप्तभिस्सप्तभिरष्टभिर्यतिः ।

२ रामं भजे मनसि रामं दधे शिरसि रामं धरामि हृदये ।
    रामं स्तुवे वचसि रामं श्रये वयसि रामं करोमि सकलम् ।
रामं नमामि भुवि रामं तनोमि हृदभिरामं मुदाऽहमधुना
    रामं स्मरामि परराम नयामि हितरामं शरीरगामिमम् ॥

४ लक्ष्मीः—नयसभयुक्ता ननसा गो दशरविकृतयतिरिह लक्ष्मीः । (∪ ∪ ∪ ∪ – – ∪ ∪ – – | ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ – –) नगणयगणसगणभगणनगणनगणसगणाः गुरुश्च । दशभिर्द्वादशभिर्यतिः ॥

नरहरिसेवां कुरु नित्यं शुभकरवरनवविधभक्त्या
    हरिहररूपं भज सत्यं जनिहरपरतरसुखतत्त्वम् ।

13488

नरवर धीरं श्रुणु पथ्यं दरहरगरधरपदभक्त्या
  मुरहरदेवं स्तुहि तेऽर्थ्यं धर गुरुरसभरपरमत्वम् ॥

२३ विकृत्याम्—

१ मत्ताक्रीडा। सूत्रम्—मौ त्नौ नौ न्लौ ग्वसुपञ्चदशतः। मत्ताक्रीडा मो म्तौ नौ नाविति लगिति च वसुशरदशयतिका। (— — — — — — — — —। ∪ ∪ ∪ ∪ ∪। ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ ∪ —) मगणमगणतगणनगणनगणनगणनगणाः लघुः गुरुश्च। अष्टभिः पञ्चभिर्दशभिर्यतिः। अथवा। अष्टाभिः पञ्चदशाभिर्यतिः॥

१ वन्दे श्रीरामं श्रीरामं मम हृदयगतमभयहितविनयं
  विश्वामित्रेड्यं सीताढ्यं पितृवचनमनुविपिनकृतवसतिम्।
सुग्रीवाकांक्षादातारं दशवदनहरमविततदवरजं
  राज्ये जानक्या संयुक्तं धरणिजनहितकरणपरवशगम्॥
२ रामे श्यामे सीतारामे त्वमयि रमय हृदयगगनपरमे
  मायातीते कायापेते सुखय विषयलयसदसदुपरमे।
संसारेऽस्मिन्किं सारस्स्यादिति हि सुमतिविदितपरमपदधी-
  स्सत्यज्ञानानन्तानन्दे विहर सततनिहतकरणवितातिम्॥

२ अद्रितनया—नजभजभा जभौ लघुगुरू बुधैस्तु गदितेयमद्रितनया। (∪ ∪ ∪ ∪ — ∪ — ∪ ∪ ∪ —। ∪ — ∪ ∪ ∪ — ∪ — ∪ ∪ ∪ —) नगणजगणभगणजगणभगणजगणभगणाः लघुः गुरुश्च। एकादशभि द्वादशभिर्यतिः॥

भज भज देवकीवरसुतं विलासभरितं सुभोगकलितं
  तव हितकारणं सुरनुतं त्रिवर्गरहितं त्रिवर्गवरदम्।
भवकृतदुःखगान्सुखयितुं य एव सुलभस्तमेव शरणं
  भज निजभक्तितो वरगुणी हिताय मतिमान्सुखाय गतिमान्॥

३ अश्वललितम्—सूत्रम्। न्जौ भ्जौ भ्जौ भ्लौ गुद्रादित्याः। यदिह नजौ भजौ भजभलगास्तदश्वललितं हरार्कयतिमान्।

(⏑⏑⏑⏑–⏑–⏑⏑⏑– । ⏑–⏑⏑⏑–⏑–⏑⏑⏑–) नगणजगणभगण जगणभगणजगणभगणाः लघुः गुरुश्च ॥ एकादशाभिर्द्वादश- भिर्यतिः ॥

स्वजननभूर्हिता जगति का समा न हि तया समानहितया
निजतनुजान्बलाद्भुतगतान्करोत्यभिमुखान्करोद्धृतसुखान् ।
कदशनतोऽपि सा प्रमुदिता दधाति मृतकं ददात्यमृतकं
सुभजत पालिनीं स्वजननीं निजां सुकृतिनो निजांशकृतिनः॥

२४ संकृत्याम्—

१ तन्वी । सूत्रम्—भ्तौ न्सौ भौ न्यौ द्विरादित्याः । भूत- मुनीनैर्यतिरिह भतनास्स्भौ भनयाश्च यदि भवति तन्वी । (–⏑⏑ ––।⏑⏑⏑⏑⏑⏑–।–⏑⏑–⏑⏑⏑⏑⏑⏑––) भगणतगणनगण- सगणभगणभगणनगणयगणाः । पञ्चभिस्सप्तभिर्द्वादशभिर्यतिः ॥

रक्षितसीतं भज भज मनसा तारकपालकसुरनरनाथं
कोसलनाथं दशरथतनुजं लक्ष्मणभूषितनिजपदलाभम् ।
वायुजसेव्यं रविसुतसुहृदं धर्मसुरक्षकभरतबलाढ्यम्
पालितधर्मं मुनिजनसुखदं धीरविभीषणसुकृतशरण्यम् ॥

२ अश्वललितम्—यदिह नजौ भसौ जसजसकास्तदश्व- ललितं स्वरेशरसाभित् ।(⏑⏑⏑⏑–⏑–। ⏑⏑⏑⏑–⏑–⏑⏑⏑–। ⏑–⏑⏑⏑–) नगणजगणभगणसगणजगणसगणजगणसगणाः । सप्तभिरेकादशभिष्षड्भिर्यतिः ॥

यदुकुलपालके कुरुकुलदावपावकसखे त्रिलोकातिलके
विनिहतकंसके सुविहतपाण्डुनन्दनसुखे प्रभावशिशुके ।
अगणितदैत्यके विगणितलोकशोकगणके सुखप्रकृतिके
शुभगुणधारके त्रिगुणविधायकेऽतिभवुके मनो लगतु मे ॥

२५ अभिकृत्याम्—

१ क्रौञ्चपदम्—सूत्रम्—भ्तौ भ्रौ नौ नौ ग्भूतांद्रियवस्वृषयः। क्रौञ्चपदा भ्तौ भरौ ननना नगाविषु शरवसुमुनियतिरिह भवेत्। (—⏑⏑——।⏑—⏑⏑—।⏑—⏑⏑⏑⏑⏑⏑।⏑⏑⏑⏑⏑⏑—) भगणतगणभगणरगणनगणनगणनगणनगणाः गुरुश्च। पञ्चभिः पञ्चभिरष्टाभिस्सप्तभिर्यतिः॥

साम्बशिवं त्वं पूजय नित्यं भवहरभयहरसुखकरनिलयं
सर्वगतं त्वं सर्वमयं तं स्थिरचरगतिकृतिरतिभृतिकरणम्।
कारणमाद्यं कार्यवशाद्यं विदुरिह चतुरधिचतुरसमतनुं
सच्चिदनन्ताऽऽनन्दसुमूर्तिं भज सुखमनुभव निजहितमतुलम्॥

२६ उत्कृत्याम्—

१ भुजङ्गविजृंभितम्—सूत्रम। मौ त्नौ नौ र्सौ ल्गौवसुरुद्रऋषयः। वस्वीशाश्वश्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृंभितम्। (————————।⏑⏑⏑⏑⏑⏑⏑⏑⏑⏑—।⏑—⏑⏑—⏑—) मगणमगणतगणनगणनगणनगणरगणसगणाः लघुः गुरुश्च। अष्टभिरेकादशाभिस्सप्तभिर्यतिः॥

देव्यां भक्तिस्सिद्धा चेन्मे करतलगतमिह भवुकं स्वजन्मफलोदयं
भक्तिश्रद्धायुक्ता प्रीतिः कृतमतिमलततिविलयाद्भवेत्सुकृतोदयात्।
प्रीतिस्तादृग्जायेतास्यां यदि शुचिमतिपरवशता ह्यनन्यशरण्यता
लब्ध्वा तां त्वं तत्कारुण्यादतिशयशमयसुपदं भजार्य सुखास्पदम्॥

२ अपवाहकः—सूत्रम्। म्नौ नौ नौ न्सौ गौ नवकर्तुरसेन्द्रियाणि। मो नाष्षट्सगागिति यदि नवरसरसशरयतियुत-

मपवाहाख्यम् । (− − − ∪ ∪ ∪ ∪ ∪ ∪ | ∪ ∪ ∪ ∪ ∪ ∪ | ∪ ∪ ∪ ∪ ∪ ∪ | ∪ ∪ − − −) मगणनगणनगणनगणनगणनगणनगणसगणाः द्वौगुरू । नवभिष्षड्भिष्षड्भिः पञ्चभिर्यतिः ॥

वन्देहं सकलजननि जननमरणजलधितरणसुधुरीणां त्वां
सन्देहान्विविधजननविषयकमतिसुदृढकलितसुपदानूहन्याः ।
सन्दोहं विजितमनसि फलिततपसि विलसदमृतसुखधाराणाम्
वन्दारौ मयि तव पदकमलमधुरमधुमधुलिहि कलयाम्ब त्वम् ॥

३ शम्भुनटनम्—जसौ नभजसा नभलगा मनुदिवाकरय-तिर्यदि तु शम्भुनटनम् । (∪ − ∪ ∪ ∪ − ∪ ∪ ∪ − ∪ ∪ ∪ − | ∪ ∪ ∪ − ∪ ∪ ∪ − ∪ ∪ ∪ −) जगणसगणनगणभगणजगणसगणनगणभगणाः लघुः गुरुश्च । चतुर्दशभिर्द्वादशभिर्यतिः ॥

नमोस्तु वशिने धृतशिरोर्ध्वशशिने लसदुमाकलितवर्ष्मबलिने
सविष्णुविधिनन्दिमुनिनारदसुराऽऽहतसुवाद्यनुतगीतरुचिरे ।
अनेकविधनृत्तयुतताण्डवमहे गिरिजया सह सुलास्ययुतया
त्रिलोकपरनाटकगृहे त्वमनिशं प्रथमसूत्रणधरो विजयसे ॥

अज्ञानादत्र ये दोषा जाताः प्रमादतो भ्रमात् ।
विद्वांसस्तान् समीकुर्युरित्यहं प्रार्थये बुधान् ॥

सामाप्तोऽयंग्रन्थः

ओं म् त त्स त्.

भाववत्सरमाघमाससितपञ्चमीभृगुवासरे (28–2–1935) कल्याणपुर्यां (बेङ्गळूरुनगरे) चन्नरायपत्तनाभिजनेन श्रीवेङ्कटरमणार्येण वाग्देवी-सेवार्थं रचितोऽयं ग्रन्थः सम्पूर्णस्समुल्लसति ॥

प्रथमोऽनुबन्धः

प्रस्तारक्रियानिष्पत्त्या वृत्तसंख्यानिर्णयः

संविधानक्रमः—यस्मिन् कस्मिन् छन्दसि यावन्त्यक्षराणि भवेयुः, प्रथमतिर्यक्श्रेण्यां तावतश्चतुष्कोणान् निर्माय, तेषु सर्वेषु गुरुचिह्नानि लेख्यानि । द्वितीयतिर्यक्श्रेण्यां तावत्स्वेव चतुष्कोणेषु मध्ये, पूर्वश्रेणीगतप्रथमगुरोरधस्स्थचतुष्कोणे लघुचिह्नं न्यस्येत । तस्य वामपार्श्वगतचतुष्कोणेषु (लेखकस्य दक्षिणपार्श्वभूतेषु), तत्पूर्वश्रेणीस्थसर्वचतुष्कोणगतगुरुलघुचिह्नानि यथावन्निवेश्यानि । तृतीयनिर्यक्श्रेण्यामपि एवमेव । परन्तु, तत्र तद्दक्षिणपार्श्वगतचतुष्कोणेषु सर्वत्र गुरुचिह्नान्येव निवेशनीयानि । चतुर्थादितिर्यक्श्रेणीगतचतुष्कोणेष्वपि एतत्क्रममेवानुसृत्य, यथोचितगुरुलघुचिह्नानि लेख्यानि । यस्यां तिर्यक्श्रेण्यां सर्वेषु चतुष्कोणेषु लघुचिह्नान्येव निक्षिप्तानि भवन्ति, तत्रैव प्रस्तारविरामो भवति । ततः, तत्प्रस्तारश्रेणी संख्याः कियत्य इति गणयित्वा, तत्रोदितानां वृत्तानामपि तावत्यस्संख्याः इति निर्णेतव्यम् ॥

यथा—

२ उक्तायाम्—एकाक्षरः पादः.

१ गुरुः	....	—	१ श्रीवृत्तं–प्रसिद्धं
२ लघुः	...	∪	२ कल्पनीयम्

इति द्वेवृत्ते निष्पद्येते ॥

सूचना–अत्र ऊर्ध्वाकारायां आद्यन्तिमात्मिकश्रेण्यां स्थितयोः चतुष्कोणयोः एकैकगुरुलघुक्रम इति विवेकः ॥

२ अत्युक्तायां द्व्यक्षरः पादः.

१ गुरू	....	—	—	१ स्त्रीवृत्तं-प्रसिद्धं
२ लघुगुरू	....	∪	—	२ कल्पनीयम्
३ गुरुलघू	....	—	∪	३ ,,
४ लघू	....	∪	∪	४ ,,

इति चत्वारि वृत्तानि निष्पद्यन्ते ॥

सूचना – अत्र ऊर्ध्वाकारायां आद्यश्रेण्यां स्थितेषु चतुष्कोणेषु यावत्पूरं पूर्वप्रस्तारवत् एकैकगुरुलघुक्रमः । ऊर्ध्वाकारायां अन्तिम श्रेण्यां स्थितेषु चतुष्कोणेषु द्विर्द्विर्गुरुलघु क्रम इति विवेकः ॥

३ मध्यमायाम् त्र्यक्षरः पादः.

१ मगणः	....	—	—	—	१ नारीवृत्तं-प्रसिद्धं
२ यगणः	....	∪	—	—	२ कल्पनीयम्
३ रगणः	....	—	∪	—	३ मृगीवृत्तं-प्रसिद्धं
४ सगणः	....	∪	∪	—	४ कल्पनीयम्
५ तगणः	....	—	—	∪	५ ,,
६ जगणः	....	∪	—	∪	६ ,,
७ भगणः	....	—	∪	∪	७ ,,
८ नगणः	....	∪	∪	∪	८ ,,

इति अष्टौ वृत्तानि निष्पद्यन्ते ॥

सूचना—अत्र ऊर्ध्वाकाराद्यद्वयश्रेणीगतचतुष्कोणेषु यावत्पूरं पूर्ववत् क्रमेण एकैकद्विर्द्विर्गुरुलघुक्रमः । ऊर्ध्वाकारान्तिमश्रेणीगत चतुष्कोणेषु चतुश्चतुर्गुरुलघुक्रम इति विवेकः ॥

४ प्रतिष्ठायां चतुरक्षरः पादः.

१ मगणोगुरुश्च	—	—	—	—	१	कन्यावृत्तंप्रसिद्धं
२ यगणः	∪	—	—	—	२	कल्पनीयम्
३ रगणः	—	∪	—	—	३	,,
४ सगणः	∪	∪	—	—	४	,,
५ तगणः	—	—	∪	—	५	,,
६ जगणः	∪	—	∪	—	६	,,
७ भगणः	—	∪	∪	—	७	,,
८ नगणः	∪	∪	∪	—	८	,,
९ मगणोलघुश्च	—	—	—	∪	९	,,
१० य ,, ...	∪	—	—	∪	१०	,,
११ र ,, ...	—	∪	—	∪	११	,,
१२ स ,, ...	∪	∪	—	∪	१२	,,
१३ त ,, ...	—	—	∪	∪	१३	,,
१४ ज ,, ...	∪	—	∪	∪	१४	,,
१५ भ ,, ...	—	∪	∪	∪	१५	,,
१६ न ,, ...	∪	∪	∪	∪	१६	,,

इति षोडशवृत्तानि निष्पद्यन्ते ॥

सूचना—अत्र ऊर्ध्वाकाराऽऽद्यत्रयश्रेणीगतचतुष्कोणेषु यावत्पूरं पूर्ववत् क्रमेण, एकैकद्विर्द्विश्चतुश्चतुर्गुरुलघुक्रमः । ऊर्ध्वाकारान्तिमश्रेणीगतचतुष्कोणेषु अष्टाष्टगुरुलघुक्रम इति विवेकः ॥

४ सुप्रातिष्ठायां—पञ्चाक्षरः पादः.

१	मगणो गुरू च	—	—	—	—	—	१ कल्पनीयम्
२	य ,, ...	∪	—	—	—	—	२ ,,
३	र ,, ...	—	∪	—	—	—	३ ,,
४	स ,, ...	∪	∪	—	—	—	४ ,,
५	त ,, ...	—	—	∪	—	—	५ ,,
६	ज ,, ...	∪	—	∪	—	—	६ ,,
७	भ ,, ...	—	∪	∪	—	—	७ पङ्क्तिः
८	न ,, ...	∪	∪	∪	—	—	८ कल्पनीयम्
९	मगणोलघुगुरू च	—	—	—	∪	—	९ ,,
१०	य ,, ...	∪	—	—	∪	—	१० ,,
११	र ,, ...	—	∪	—	∪	—	११ ,,
१२	स ,, ...	∪	∪	—	∪	—	१२ ,,
१३	त ,, ...	—	—	∪	∪	—	१३ ,,
१४	ज ,, ...	∪	—	∪	∪	—	१४ ,,
१५	भ ,, ...	—	∪	∪	∪	—	१५ ,,
१६	न ,, ...	∪	∪	∪	∪	—	१६ ,,
१७	मगणोगुरुलघू च	—	—	—	—	∪	१७ ,,
१८	य ,, ...	∪	—	—	—	∪	१८ ,,

१९ रगणोगुरुलघू च	—	∪	—	—	∪	१९ कल्पनीयम्
२० स ,, ...	∪	∪	—	—	∪	२० ,,
२१ त ,, ...	—	—	∪	—	∪	२१ ,,
२२ ज ,, ...	∪	—	∪	—	∪	२२ ,,
२३ भ ,, ...	—	∪	∪	—	∪	२३ ,,
२४ न ,, ...	∪	∪	∪	—	∪	२४ ,,
२५ मगणोलघू च....	—	—	—	∪	∪	२५ ,,
२६ य ,, ...	∪	—	—	∪	∪	२६ ,,
२७ र ,, ...	—	∪	—	∪	∪	२७ ,,
२८ स ,, ...	∪	∪	—	∪	∪	२८ ,,
२९ त ,, ...	—	—	∪	∪	∪	२९ ,,
३० ज ,, ...	∪	—	∪	∪	∪	३० ,,
३१ भ ,, ...	—	∪	∪	∪	∪	३१ ,,
३२ न ,, ...	∪	∪	∪	∪	∪	३२ ,,

इति द्वात्रिंशद्वृत्तानि निष्पद्यन्ते ॥

सूचना—अत्र ऊर्ध्वाकाराऽऽद्यचतुष्टयश्रेणीगतचतुष्कोणेषु यावत्पूरं पूर्ववत्क्रमेण, एकैकाद्विर्द्विश्चतुश्चतुरष्टाष्टगुरुलघुक्रमः । ऊर्ध्वाकारान्तिमश्रेणीगतचतुष्कोणेषु, षोडशषोडशगुरुलघुक्रमइति विवेकः ॥

गायत्र्यां षडक्षरः पादः

१ मगणमगणौ	—	—	—	—	—	—	१ विद्युल्लेखा
२ य ,, ...	∪	—	—	—	—	—	२ कल्पनीयम्
३ र ,, ...	—	∪	—	—	—	—	३ ,,
४ स ,, ...	∪	∪	—	—	—	—	४ ,,
५ त ,, ...	—	—	∪	—	—	—	५ ,,
६ ज ,, ...	∪	—	∪	—	—	—	६ ,,
७ भ ,, ...	—	∪	∪	—	—	—	७ ,,
८ न ,, ...	∪	∪	∪	—	—	—	८ ,,
९ मगणयगणौ	—	—	—	∪	—	—	९ ,,
१० य ,, ...	∪	—	—	∪	—	—	१० सोमराजी
११ र ,, ...	—	∪	—	∪	—	—	११ कल्पनीयम्
१२ स ,, ...	∪	∪	—	∪	—	—	१२ ,,
१३ त ,, ...	—	—	∪	∪	—	—	१३ तनुमध्या
१४ ज ,, ...	∪	—	∪	∪	—	—	१४ कल्पनीयम्
१५ भ ,, ...	—	∪	∪	∪	—	—	१५ ,,
१६ न ,, ...	∪	∪	∪	∪	—	—	१६ शशिवदना
१७ मगणरगणौ	—	—	—	—	∪	—	१७ कल्पनीयम्
१८ य ,, ...	∪	—	—	—	∪	—	१८ ,,

१९ रगणरगणौ	—	∪	—	—	∪	—	१९ कल्पनीयम्
२० स ,, ...	∪	∪	—	—	∪	—	२० ,,
२१ त ,, ...	—	—	∪	—	∪	—	२१ ,,
२२ ज ,, ...	∪	—	∪	—	∪	—	२२ ,,
२३ भ ,, ...	—	∪	∪	—	∪	—	२३ ,,
२४ न ,, ...	∪	∪	∪	—	∪	—	२४ ,,
२५ मगणसगणौ	—	—	—	∪	∪	—	२५ ,,
२६ य ,, ...	∪	—	—	∪	∪	—	२६ ,,
२७ र ,, ...	—	∪	—	∪	∪	—	२७ ,,
२८ स ,, ...	∪	∪	—	∪	∪	—	२८ ,,
२९ त ,, ...	—	—	∪	∪	∪	—	२९ वसुमती
३० ज ,, ...	∪	—	∪	∪	∪	—	३० कल्पनीयम्
३१ भ ,, ...	—	∪	∪	∪	∪	—	३१ ,,
३२ न ,, ...	∪	∪	∪	∪	∪	—	३२ ,,

गायत्र्यां षडक्षरः पादः

३३ मगणतगणौ	—	—	—	—	—	∪	३३ कल्पनीयम्
३४ य ,, ...	∪	—	—	—	—	∪	३४ ,,
३५ र ,, ...	—	∪	—	—	—	∪	३५ ,,
३६ स ,, ...	∪	∪	—	—	—	∪	३६ ,,
३७ त ,, ...	—	—	∪	—	—	∪	३७ ,,
३८ ज ,, ...	∪	—	∪	—	—	∪	३८ ,,
३९ भ ,, ...	—	∪	∪	—	—	∪	३९ ,,
४० न ,, ...	∪	∪	∪	—	—	∪	४० ,,
४१ मगणजगणौ	—	—	—	∪	—	∪	४१ ,,
४२ य ,, ...	∪	—	—	∪	—	∪	४२ ,,
४३ र ,, ...	—	∪	—	∪	—	∪	४३ ,,
४४ स ,, ...	∪	∪	—	∪	—	∪	४४ ,,
४५ त ,, ...	—	—	∪	∪	—	∪	४५ ,,
४६ ज ,, ...	∪	—	∪	∪	—	∪	४६ ,,
४७ भ ,, ...	—	∪	∪	∪	—	∪	४७ ,,
४८ न ,, ...	∪	∪	∪	∪	—	∪	४८ ,,
४९ मगणभगणौ	—	—	—	—	∪	∪	४९ ,,
५० य ,, ...	∪	—	—	—	∪	∪	५० ,

५१ रगणभगणौ	—	∪	—	—	∪	∪	५१ कल्पनीयम्
५२ स ,, ...	∪	∪	—	—	∪	∪	५२ ,,
५३ त ,, ...	—	—	∪	—	∪	∪	५३ ,,
५४ ज ,, ...	∪	—	∪	—	∪	∪	५४ ,,
५५ भ ,, ...	—	∪	∪	—	∪	∪	५५ ,,
५६ न ,, ...	∪	∪	∪	—	∪	∪	५६ ,,
५७ मगणनगणौ	—	—	—	∪	∪	∪	५७ ,,
५८ य ,, ...	∪	—	—	∪	∪	∪	५८ ,,
५९ र ,, ...	—	∪	—	∪	∪	∪	५९ ,,
६० स ,, ...	∪	∪	—	∪	∪	∪	६० ,,
६१ त ,, ...	—	—	∪	∪	∪	∪	६१ ,,
६२ ज ,, ...	∪	—	∪	∪	∪	∪	६२ ,,
६३ भ ,, ...	—	∪	∪	∪	∪	∪	६३ ,,
६४ न ,, ...	∪	∪	∪	∪	∪	∪	६४ ,,

इति चतुष्षष्टिवृत्तानि निष्पद्यन्ते ॥

सूचना—अत्र ऊर्ध्वाकाराऽऽद्यपञ्चश्रेणीगतचतुष्कोणेषु यावत्पूरं पूर्ववत् क्रमेण, एकैकद्विर्द्विश्चतुश्चतुरष्टाष्टषोडशषोडशगुरुलघुक्रमः। ऊर्ध्वाकारान्तिमश्रेणीगतचतुष्कोणेषु द्वात्रिंशद्द्वात्रिंशद्गुरुलघुक्रम इति विवेकः ॥

एवं प्रस्तारनिष्पादनक्रमः दिङ्मात्रं सूचितः। शेषास्त्वतिसूक्ष्मबुद्धिगोचराः भवन्तीति सर्वं शिवम् ॥

द्वितीयोऽनुबन्धः.

गणितविधानेन वृत्तसंख्यानिर्णयः.

छन्दस्संख्या	गणिततन्त्रम्	गुणनक्रमः	फलितवृत्तसंख्या	गुण्यसंख्या-[सूचकम्.
१	$(२)^{१}$	१ × २	२	अ
२	$(२)^{२}$	अ × २	४	आ
३	$(२)^{३}$	आ × २	८	इ
४	$(२)^{४}$	इ × २	१६	ई
५	$(२)^{५}$	ई × २	३२	उ
६	$(२)^{६}$	उ × २	६४	ऊ
७	$(२)^{७}$	ऊ × २	१२८	ऋ
८	$(२)^{८}$	ऋ × २	२५६	ॠ
९	$(२)^{९}$	ॠ × २	५१२	ऌ
१०	$(२)^{१०}$	ऌ × २	१,०२४	ॡ
११	$(२)^{११}$	ॡ × २	२,०४८	ए
१२	$(२)^{१२}$	ए × २	४,०९६	ऐ
१३	$(२)^{१३}$	ऐ × २	८,१९२	ओ
१४	$(२)^{१४}$	ओ × २	१६,३८४	औ
१५	$(२)^{१५}$	औ × २	३२,७६८	अं
१६	$(२)^{१६}$	अं × २	६५,५३६	अः
१७	$(२)^{१७}$	अः × २	१,३१,०७२	क
१८	$(२)^{१८}$	क × २	२,६२,१४४	ग

छन्दस्संख्या	गणिततन्त्रम्	गुणनक्रमः	फलितवृत्तसंख्या	गुण्यसंख्या.
१९	$(२)^{१९}$	ग × २	५,२४,२८८	च
२०	$(२)^{२०}$	च × २	१०,४८,५७६	ज
२१	$(२)^{२१}$	ज × २	२०,९७,१५२	ट
२२	$(२)^{२२}$	ट × २	४१,९४,३०४	ड
२३	$(२)^{२३}$	ड × २	८३,८८,६०८	त
२४	$(२)^{२४}$	त × २	१,६७,७७,२१६	द
२५	$(२)^{२५}$	द × २	३,३५,५४,४३२	प
२६	$(२)^{२६}$	प × २	६,७१,०८,८६४	ब
संकलिताः				अकारादिवकारान्ताः
२६	$(२)^{२६}$		१३,४२,१७,७२६	

सूचना—सार्धत्रयोदशकोटिप्रायिकसंख्याकेषु वृत्तेषु सत्सु, सार्धशतप्रायिकवृत्तान्येव प्रसिद्धानि, शेषभूतानि, अप्रसिद्धानीति, अस्मद्दौभार्ग्यमेतत् आधुनिकार्याणां प्रतिभासंकोचं घोषयति । तन्निवारणाय प्रतिभाशालिभिः नवनवानि वृत्तानि कल्पनीयानि, ग्रन्थेषु प्रयोक्तव्यानि च ॥

तृतीयोऽनुबन्धः

वृत्तसंख्यया नष्टवृत्तस्वरूपनिर्धारः

यस्मिन् कस्मिन् वा छन्दसि जातानां वृत्तानां संख्यासु, या काचित् संख्या यदि निर्दिष्टा, तत्संख्याङ्कं द्वाभ्यां विभक्तुं शक्यते चेत्, तदा तद्वृत्तपादस्य प्रथमाक्षरम् लघुरिति उन्नेयम्। तथा विभक्तुं न शक्यते चेत्, तस्याङ्कस्य एकं संकलय्य विभज्यते, एवं सति प्रथमाक्षरम् गुरुरिति उन्नेयम्। एवं विभागे यो ऽङ्को लभ्यते. तमपि पूर्वक्रमानुसारेण विभज्य, द्वितीयाक्षरम् लघुर्वा गुरुर्वा भवतीति निर्धारितव्यं। तृतीयचतुर्थाक्षरादिनिर्धारेऽपि, अयमेव नियमोऽनुसर्तव्यः। एतदुक्तं भवति–निर्दिष्टाङ्को वा पुनः पुनः अर्धार्धविभागेन लब्धाङ्को वा, द्वौ-चत्वारि-षट्-अष्टेत्यादि समाङ्को यदा भवति, तदा, वृत्तस्याक्षराणि लघूनि, अन्यथा स, एकः-त्रयः-पञ्च सप्तेत्यादि विषमाङ्कः यदा भवति, तदा तानि गुरुणि। एकमादाय अर्धीकरणं गुरोर्ज्ञापकं, एकमनादायैव अर्धीकरणं लघोर्ज्ञापकमिति विवेकः। यथा–प्रतिष्ठाच्छन्दसि जातानां षोडशवृत्तानां मध्ये, पञ्चदशतमवृत्तस्य स्वरूपविवक्षायां, गणिततन्त्रमेवं भवति। निर्दिष्टवृत्तसंख्याङ्कः १५ विषमाङ्को भवति। अयं एकमनादाय अर्धीकर्तु न शक्यः। अतः, तस्मिन् एकेन संकलय्य अर्धीकृते १५+१=१६÷२=८ इति समाङ्को लब्धः। तस्मात् प्रथमाक्षरं गुरुर्भवति (–)। अयं लब्धाङ्कः एकमनादाय ८÷२=४ इति अर्धीकर्तुं शक्यः। तस्मात् द्वितीयाक्षरं, लघुर्भवति (ᴗ)। अयं लब्धाङ्कः पुनः एकमनादाय, ४÷२=२ इति अर्धीकर्तुं शक्यः। तस्मात् तृतीयाक्षरमपि लघुः (ᴗ)। अयमपि लब्धाङ्कः एकमनादायैव, २÷२=१ इति अर्धीकर्तुं शक्यः। तस्मात् चतुर्थाक्षरमपि लघुः (ᴗ)। एवं, –ᴗᴗᴗ इति भगणो लघुश्चेति पञ्चदशतमवृत्तपादस्वरूपं निर्धार्यते॥

तथा तस्मिन्नेव छन्दसि, प्रथमषोडशतमवृत्तयोः स्वरूपे एवं भवतः—

(१) १+१=२÷२=१ प्रथमाक्षरम् (–)
(२) १+१=२÷२=१ द्वितीयाक्षरम् (–)
(३) १+१=२÷२=१ तृतीयाक्षरम् (–)
(४) १+१=२÷२=१ चतुर्थाक्षरम् (–)

एवं सर्वगुरुः (– – – –) अथवा मगणो गुरुश्च पादो भवति॥

तथा (१) १६÷२=८ प्रथमाक्षरम् (᳚)
(२) ८÷२=४ द्वितीयाक्षरम् (᳚)
(३) ४÷२=२ तृतीयाक्षरम् (᳚)
(४) २÷२=१ चतुर्थाक्षरम् (᳚)

एवं सर्व लघुः (᳚ ᳚ ᳚ ᳚) अथवा नगणो लघुश्च पादः। तस्मिन्नेव छन्दसि चतुर्थाष्टमद्वादशतमवृत्तस्वरूपाणि यथा—

I	II
४÷२=२ (᳚)	८÷२=४ (᳚)
२÷२=१ (᳚)	४÷२=२ (᳚)
१+१=२÷२=१ (–)	२÷२=१ (᳚)
१+१=२÷२=१ (–)	१+१=२÷२=१ (–)
एवं ᳚ ᳚ – – सगणो गुरुश्च।	एवं ᳚ ᳚ ᳚ – नगणो गुरुश्च।

III १२÷२=६ (᳚)
६÷२=३ (᳚)
३+१=४÷२=२ (–)
२÷२=१ (᳚)
एवं ᳚ ᳚ – ᳚ सगणो लघुश्च।

सर्वत्र प्रथमेऽनुबन्धे निर्दिष्टे प्रतिष्ठाच्छन्दःप्रस्तारे परीक्षां कृत्वा समाधातव्यं। एवमन्यत्र॥

———

चतुर्थोऽनुबन्धः

उद्दिष्टवृत्तस्वरूपज्ञानेन तद्वृत्तसंख्यानिर्णयः

यस्मिन् कस्मिन् छन्दसि यस्य कस्य वा वृत्तस्य पादे विद्यमाने गुरुलघुस्वरूपे ज्ञाते, तच्छन्दसि जातानां वृत्तानां संख्यासु मध्ये, तद्वृत्तं कतममिति निर्णयायेदं लघुतन्त्रम् । प्रथमं तावत् वृत्तपादाक्षराणि सुविशदं विलिख्य, तेषामधः क्रमेण गुरुलघ्वात्मकप्रस्तारं विरचय्य, तेषामधस्तनेषु स्थानेषु क्रमशः एकाङ्कमारभ्य पूर्वपूर्वाङ्कद्विगुणितानङ्कान् यावदक्षरान्तं विलिखेत् । तत्क्रमस्तु— एकाङ्कचिह्नं (१) प्रथमाक्षरस्याधः, तद्द्विगुणिताङ्कं द्वे (२) द्वितीयाक्षरस्याधः, तद्द्विगुणिताङ्कं चत्वारि ४) तृतीयाक्षरस्याधः, तद्द्विगुणिताङ्कमष्टौ (८) चतुर्थाक्षरस्याधः, तत्परतोपि एवमेव तत्तदक्षरस्याधः समुचितानङ्कान्निवेशयेत् । ततः तत्र पादे यावन्तो लघवो विद्यन्ते तेषामधस्स्थापितान् सर्वान् अङ्कान् संकलय्य एकमधिकं संयोजयेत् । एवंकृते, या संख्या लभ्यते, सैवोद्दिष्टवृत्तस्य संख्येति निर्णीयेत । यथा—प्रतिष्ठाच्छन्दसि षोडशवृत्तानि भवन्ति । तेषु, उद्दिष्टवृत्तं 'श्रीशं भजे' इति ॥

१ अत्र अक्षराणि —	श्री	शं	भ	जे
प्रस्तारः	—	—	ᴗ	—
पूर्वोक्तक्रमेण अङ्केषु	१	२	४	८

इति निक्षिप्तेषु सत्सु, लघ्वक्षराधस्स्थसंख्या ४ चत्वारीति ज्ञायते । अधिकया, एकसंख्यया संयोजिता सा, ५ पञ्च भवति । अतः उद्दिष्टवृत्तं पञ्चमं भवति ॥

२ तथा, गायत्री छन्दसि चतुष्षष्टिवृत्तानि भवन्ति । तेषु

'नमस्ते गुरवे'						इत्यत्र सर्वलघुसंख्यासङ्कलनाङ्कः, १+८+१६=२५ । अधिकमेकेन संयोजिताङ्कः २५+१=२६ भवति । अतः, इदं वृत्तं षड्विंशतितमं भवति ॥
ᴗ	—	—	ᴗ	ᴗ	—	
१	२	४	८	१६	३२	

३ अष्ट्याख्यषोडशाक्षरछन्दसि, अनेन ग्रंथकर्त्रा नवीन-

तया परिभावितं स्वकीये स्तुतिकुसुमाञ्जल्याख्यग्रन्थे प्रयुक्तं गुणभूषाख्यवृत्तं, अस्मिन् संदर्भे नष्टोद्दिष्टतन्त्राभ्यां परीक्ष्य दृढीक्रियते तद्यथा—वृत्तम् ॥

गिरिजेऽलं सुरजालं भजते त्वाऽ सुरजालम् ।

∪ ∪ — — ∪ ∪ — — ∪ ∪ — — ∪ ∪ — —
१, २, ४, ८, १६, ३२, ६४, १२८, २५६, ५१२, १०२४, २०४८, ४०९६,

∪ — —
८१९२, १६३८४, ३२७६८.

सङ्कलितास्सर्वे लघ्वङ्काः १३,१०७ एकेन संयोजितोऽयं १३१०७+१=१३,१०८ भवति । अनेन तन्त्रेण इदं गुणभूषावृत्तं तच्छन्दसि १३,१०८ तमं भवतीति ज्ञायते ॥

इदानीमिदं वृत्तं तन्त्रान्तरेण परीक्ष्यते । यथा—वृत्तसंख्या १३,१०८ इति पूर्वतन्त्रेण ज्ञातम् । इयमत्र निर्दिष्टा संख्या । वृत्तस्वरूपमनया निर्धार्यते ॥

(१) इयं समसंख्या, एकमधिकमनादायैव १३,१०८÷२= ६५५४ इति अर्धीकर्तुं शक्यते, अतः वृत्तपादस्य प्रथमाक्षरं लघुः (∪) ॥

(२) पुनः ६,५५४÷२=३,२७७ इति द्वितीयाक्षरमपि लघुः(∪)॥

(३) इयं संख्या ३,२७७ विषमाङ्कान्तत्वात् एकमधिकं आदायैव ३२७७+१=३२७८÷२=१६३९ इति अर्धीकर्तुं शक्या, अतः तृतीयाक्षरं गुरुः (—) तथा (४) १६३९+१=१६४०÷२=८२० इति चतुर्थाक्षरमपि गुरुः (—) । तथा (५) ८२०÷२=४१० लघुः (∪) (६) ४१०÷२=२०५ लघुः (∪) । (७) २०५+१=२०६÷२=१०३ (—) (८) १०३+१=१०४÷२=५२ (—) । (९) ५२÷२=२६ (∪) । (१०) २६÷२=१३ (∪) । (११) १३+१=१४÷२=७ (—) । (१२) ७+१=८÷२=४ (—) । (१३) ४÷२=२ (∪) । (१४) २÷२=१ (∪) । (१५) १+१=२÷२=१ (—) । (१६) १+१=२÷२=१ (—) । एवं ∪∪——∪∪——∪∪——∪∪—— इति वृत्तस्वरूपं ज्ञातं । एवं अन्योन्यतन्त्रपरीक्षया अष्टयां एतादृशं वृत्तमस्तीति दृढीकृतम् । तस्य नाम गुणभूषेति कविना सुविचार्य कृतं भवति ॥

पञ्चमोऽनुबन्धः.

यतिविचारः.

पिङ्गलसूत्रम्—(६–१) 'यतिर्विच्छेदः' विच्छिद्यते विरम्यते पदपाठोऽस्मिन्निति विच्छेदः । यतिशब्दस्याधिकरणव्युत्पत्त्या, समुद्राद्यनवच्छिन्नेष्वक्षरेषु यतिः कर्तव्येत्ययमर्थस्सिध्यति । तत्रैषा यत्युपदेशोपनिषद्भवति । (उपनिषत्पौर्वाचार्यपारंपर्यसिद्धो नियमः)

यतिविषयकप्रमाणवचनानि	कविप्रयोगाः
१ यतिस्सर्वत्र पादान्ते	"विशुद्धज्ञानदेहाय"
२ श्लोकार्धे तु विशेषतः ।	"नमस्यामि सदोद्भूतमन्थर्नीकृतमन्मथम् ।"
३ समुद्रादिपदान्ते च	"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु"
४ व्यक्ताव्यक्तविभक्तके ॥	"वशीकृतजगत्कालं कण्ठे कालं नमाम्यहम् । महाकालं कलाशेषशशिलेखाशिखामणिम् ॥"
५ क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् । यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥	"पर्याप्तं तप्तचामीकरकटकतटे श्लिष्टपीतेतरांशौ"
पादान्तेऽस्य निषेधः ।	(प्रणमामि भवबन्धक्लेशनाशाय नारायणचरणसरोजद्वन्द्वहेतुम् । इत्यत्र)

यतिविषयकप्रमाणवचनानि	कविप्रयोगाः
तथा पूर्वापरयोर्भागयोरेकाक्षरत्वे ।	(एतस्यागण्डुनलमनुदिनं गाहते चन्द्रकक्षां । इत्यत्र)
६ पूर्वान्तवत्स्वरसन्धौ	" स्यादस्थानोपगतयमुनासंगमेवाभिरामे । तथा—" दिक्कालाद्यनवच्छिन्नाऽनन्ताचिन्मात्रमूर्तये । "
७ क्वचिदेव परादिवत् । अस्यार्थः—येयं पूर्वापरयोरेकादेशः स्वरसन्धौ विधीयते क्वचित्पूर्वस्यान्तवद्भवति क्वचित्परस्यादिवत् । तथा च पाणिनिः— " अन्तादिवच्च " ।	" स्कन्धो विन्ध्याद्रिबुध्या निकषति महिषस्याहितोऽस्तं प्रयास्यन् " । तथा — " शूलं शूलं तु गाढं प्रहर हर हृषीकेशकेशोपवक्त्रश्चक्रेणाकारि किं ते "—अत्र स्वररूपस्य परादिवद्भावे व्यंजनमपि तद्भक्तत्वात् तदादिवद्भवति ॥
८ द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवत् ।	" विततघनतुषारक्षोदशुभ्रांशुपूर्णास्वविरलपदमालां श्यामलामुल्लिखन्त " इत्यादि ॥
९ नित्यं प्राक्पदसंबन्धाश्चादयः प्राक्पदान्तवत् । (तेभ्यः पूर्वा यतिर्न कर्तव्येत्यर्थः) पूर्वपदान्तवद्भावो मा भूत् ।	" स्वादु स्वच्छं सलिलमपि च प्रीतये कस्य न स्यात् " " मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकामाः "
१० परेण नित्यसंबन्धाः प्रादयश्च परादिवत् । तेभ्यः पूर्वा यतिर्न कर्तव्येत्यर्थः ।	" दुःखं मे प्रक्षिपति हृदयं दुस्सहस्तद्वियोगः "

यतिविषयकप्रमाणवचनानि	कविप्रयोगाः
कर्मप्रवचनेभ्यः परापि यथा स्यात् ।	" प्रियं प्रति स्फुरत्पादे मन्दायन्ते न खल्विति । श्रेयांसि बहुविघ्नानि भवन्ति महतामपि " ॥

कविकल्पलतायां

३ 'यतिभंगो नामधातुभागभेदाद्यथाभवेत्' एवञ्च पादान्ते धातुप्रातिपदिकयोरेकदेशं गत्वा तदुत्तरपादादौ शिष्टाक्षरसंनिदेशाद्यतिभंगो भवेदित्यर्थः। स्वरसन्धौतु न । यथा—'श्रीशोऽस्तु-भूत्यै भवते' 'देवदेवजगन्नाथाऽभिवन्दे त्वां सनातनं' इत्यत्र च यतिभङ्गः न भवति। एकस्वरोपसर्गलक्षणत्वात्। स्वप्रकृत्यन्वयित्वेन, शाब्दबोधविषयत्वमेव श्रूयमाणविभक्तित्वं ॥

४ तत्रैव—एकाक्षरोपसर्गेन विच्छेदः श्रुतिसौख्यहृत्। यथा यथोद्वेगः सुधियां नोपजायते, तथा तथा मधुरतानिमित्तं यतिरिष्यते ॥

पदमध्येतु एकाक्षरस्यापि पूर्वान्तवद्भावो न यतिभङ्गकरः। यथा—जम्भारातीभकुम्भोदुत्यादौ। तथा चादीनामपि परादिवद्भावश्च। यथा—चाननानां चतुर्णामित्यत्र ॥

५ यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते । सा विच्छेद-विरामाद्यैः पदैर्वाच्या निजेच्छया। छन्दोमञ्जर्याम् ॥

६ यतिर्विच्छेदसंज्ञिका (इति केदारपण्डितः) विच्छेदः पदच्छेद इति संज्ञा यस्यास्सा ॥

७ श्लोकेषु नियमस्थानं पदच्छेदं यतिर्विदुः। (इति दण्डी) ॥

८ धातुनाम्नामभेदेन विरामो विरतिर्यतिः । स्वरसन्ध्यात्त-सौन्दर्यात्तद्भेदपीष्यते क्वचित्। (इति पिंगलमुनिः ॥

शुद्धाऽशुद्धपत्रिका.

पुटः	पङ्क्तिः	अशुद्धम्	शुद्धम्
v	16	विद्यालय संस्कृत	विद्यालयसंस्कृत
xiii	15	तूर्णकम्	तूणकम्
xiv	8	(निशा	निशा (
xvii	3	सा।	सा
xviii	13	( )	(ᵕ)
xix	6	कंचेति	कं चेति
4	16	५	७
5	3	भरध्वाज	भरद्वाज
,,	,,	वसिष्ठौ	वसिष्ठौ
,,	19	७	८
,,	25	धर्यः	धुर्यः
7	20	ध्रूवो	ध्रुवो
,,	24	ध्रूव	ध्रुव
11	7	सदा गति	सदागति
,,	11	मावि	माऽऽवि
12	24	वास्य	वाऽस्य
13	16	शताश्रय	शताऽऽश्रय
14	3	दाषः	दोषः
,,	14	वि³श्वंकर्माऽ	वि³श्वं कर्माऽ
15	2	प्रभयात्तम्	प्रभयाऽऽत्तम्
19	13	पजातिः	उपजातिः
20	3	प्रकाशादि	प्रकाशाऽऽदि
,,	4	सदान्त	सदाऽन्त
24	2	सत्यानृत	सत्याऽनृत
27	15	वशा।	वशा
30	12	९	१
,,	22	परमात्मा	परमाऽऽत्मा
,,	25	परात्मनि	पराऽऽत्मनि

पृष्ठः	पङ्क्तिः	अशुद्धम्	शुद्धम्
31	4	करुणाभय	करुणाऽभय
,,	5	समतार्जव	समताऽऽर्जव
32	24	नृपार्थ	नृपाऽर्थ
34	3	(∪∪∪∪. .	(∪∪∪∪—∪
37	6	दुर्गाष्टमे	दुर्गाऽष्टमे
,,	19	प्रजाना	प्रजाना-
39	6	कत्रा	कर्त्री
,,	18		३
,,	25	देवाद्य	देवाऽऽद्य
40	1	पदाद्य	पदाऽऽद्य
,,	3	दैवात्म	दैवाऽऽत्म
,,	17	काम्यार्थ	काम्याऽर्थ
42	7	विजयाद्य	विजयाऽऽद्य
,,	14	नरामर	नराऽमर
,,	21	सहत्वां	सह त्वां
,,	24	प्रियात्म	प्रियाऽऽत्म
44	27	पद्याः	पद्योः
46	4	विष्फूर्जितम्	विस्फूर्जितम्
,,	5	विष्फूर्जितम्	विस्फूर्जितम्
48	14	सान्निध्याप्ताः	सान्निध्याऽऽप्ताः
51	11	सुग्रीवाकांक्षा	सुग्रीवाऽऽकांक्षा
,,	14	मायातीते	मायाऽतीते
,,	,,	कायापेते	कायाऽपेते
,,	16	सत्यज्ञानानन्तानन्दे	सत्यज्ञानाऽनन्ताऽऽनन्दे
,,	18	न . . ण	नगण
53	21	जायेतास्यां	जायेताऽस्यां
,,	23	शमय	शममय
54	20	पु ां	पुर्यां
55	14	श्रेणी संख्या	श्रेणीसंख्या

chandas
Sanskrit Lit — chandas